No. १५०७ क

Title श्यामा रहस्यम्

Author

Extent १४२ पत्र Age सं. १८५०

Subject तन्त्र

	Do. ...	1	60	1	120	60	...
	Saddlers ...	...	...	2	240	240	...
	Stationery ...	...	36	...	...	...	36
	Rakhas ...	...	...	12	756	756	...
	Total ...	4	1,536	18	2,436	1,056	156
Riding stable ...	Head Daroga ...	1	180	1	180	...	...
	Assist. " ...	2	216	2	216	...	...
	Clerk ...	1	180	1	180	...	...
	Farriers ...	2	192	2	240	48	...
	Rough riders ...	1	96	1	132	36	...
	Mochi ...	1	96	...	...	...	96
	Syces ...	45	2,160	45	2,880	720	...
	Bhishties ...	2	96	2	120	24	...
	Sweepers ...	2	72	2	96	24	...
	Grain for 80 ponies...	...	[illegible]	...	1,600	...	...
	Masala ...	...	50	...	[illegible]	...	...
	Total ...	57	4,938	56	5,694	852	96

SHED.	
Officer in charge ...	1
Moharir ...	1
Jamadars ...	2
Fakir ...	1
Camel driver ...	16
Total ...	21
Equipment ...	...
Rasab ...	...
Drugs ...	...
Total ...	...
Total elephant stables.	

District.	Detailed Head.	Particulars.	No. 1953.	Amount 1953.	No. 1954.	Amount 1954.	Increase.	Decrease.
Jammu ...	Contingencies ...	Stationery ...	...	12	...	...	...	12
		Drugs ...	...	300	...	300	...	...
		Uniform for drivers...	...	218	...	210	...	8
		Total ...	...	530	...	510	...	20
		Add for rounding ...	...	...	...	48	48	...
		Net amount ...	...	530	...	558	48	20
	Flour ...	Ratab ...	...	6,320	...	10,356	4,036	...
	Fodder ...	Fodder green and dry	...	6,370	...	6,000	...	370
	Equipment ...	Jhools and ropes ...	...	1,600	...	1,600	...	...
	Purchase of elephant	Purchase of elephants	...	3,000	...	2,000	...	1,000

District.	Detailed
	Transport

5760 [illegible]

Part 1st – 60

Part 2nd $\frac{20}{1}$ to $\frac{20}{84}$

Total No. of F =

60
84

Total [144]

Complete

कृपासारहस्यम्

श्या
मा॰र॰
१

ॐश्रीगणेशाय नमः श्रीकालिकायै न
मः ॐश्रीदेवीदानवदैत्यकोटिनिवहा
न्संहारयंतीं शिवां ब्रह्मानंतमहेशमौलि
मणिभिः संशोभितांघ्रिद्वयीम् नत्वा श्री
गुरुदेवतांघ्रियुगलं सोऽजानाम्नतज्ञावितः
पूर्णानंदगिरिस्तनोति मुनितमो श्यामार
हस्याभिधम् स्वतंत्रे वीरतंत्रे च फेत्कारी
तंत्रमेव च कालिकाकुलसर्वस्वे काली
तंत्रे च यामलम् कुलचूडामणौ चैव कुमा
रीतंत्रमेव च कुलार्णवे तथा कालीकु
लभैरवतंत्रकम् कालिकाकुलसद्भावे
तथा चोत्तरतंत्रकम् गृहीणां च मतं ज्ञात्वा
साधकानां मतं तथा शुद्धबुद्धस्वभावा
र्यैवक्ष्यामि मोक्षकारिणम् तत्रादौ ह्यवि
शाल्पकरी विद्वाणोमि तदुक्तं स्वतंत्रे क्रो
धीशं विन्दुसंयुक्तं त्रिमूर्त्याग्निसमायुतम्
त्रिलिंखेत्परतो देवि हूंकारद्वयमेव हि
मायाद्वयं समालिख्य दक्षिणे कालिके
पि च पूर्ववत्सर्वबीजानि चाद्धरेत्परमेश्व
रि स्वाहांतेयं महाविद्या द्वाविंशत्यक्षरी

परा अनया सह प्रीतिविद्यानाल्पन्याज्ञान
साधने कुमारीतेऽपि अस्मिग्रन्थेन रहस्येन
ज्ञानमेकं सनातनम् अस्तु वाच स्वगोप्य
चकथितं नैव शाक्ताने अतीव मस्त्रियासी
त्निकथयामि तव प्रिये रूपाणि बहुसं
ख्यानि प्रकृते सन्ति भामिनि तेषां मध्ये
धा॰ प्रधानाख्यं कालीरूपं मनोहरम् विशे
षतः कलियुगे नराणां भुक्तिमुक्तिदम्
उ॰ तस्याँ उपासकाश्चैव ब्रह्मा विष्णुशिवाद
यः चंद्रः सूर्यश्च वरुणः कुवेरोऽग्निस्तथा
परः दुर्वासश्च वसिष्ठश्च दत्तात्रेयो बृहस्प
तिः बहुनां किमिहोक्तेन सर्वे देवा उपास उ॰
काः कालिकायाः प्रसादेन भुक्तिमुक्त्योश्च
भागिनः तस्या मंत्रं प्रवक्ष्यामि येनारक्षेज
गत्त्रयम् ककारं वह्निसंयुक्तं शान्तबिंदु
समन्वितम् त्रिगुणं तु ततः कूर्चयुगल
जायुगं ततः दक्षिणे कालिके चेति पूर्व
बीजानि चोद्धरेत् वह्निजायावधिः प्रोक्तः
कालिकाया मनुर्मतः नवासिद्धाद्यपे
क्षास्ति नारिमित्रादिचिंतनम् क्रतोव

घ्या
मा० र०
२
2

अथ हैनं ब्रह्मरंध्रे ब्रह्मस्वरूपिणीमाप्नोति सु
भगां त्रिगुणांमुक्ताक्षभगांत्तकामरेफेंदि
राबिंदुमेलनरूपामेतत्त्रिगुणितामाद्योत
दनुकूर्चद्वयम् कूर्चबीजेन व्योमषष्ठस्व
रबिंदुमेलनरूपेण देवहिरुच्चार्य भुवन
द्वयं भुवनान्तव्योमानलेंदिराशून्यमेलन
रूपातद्वयदक्षिणेकालिकेइत्याभिमुखा
नान्तदनुबीजसप्तकमुच्चार्य हृद्भानुजा
यामुच्चरेत् सत्तुशिवमयो भवेत्सर्वसि
द्धीश्वरो भवेत् गतिस्तस्यास्ति नान्यस्येति
सतु नारीश्वरः सतु सर्वेश्वर इति भैरवतं
त्रेपि नात्र विघ्नविष्णुद्विवीनारिमित्रादि
दूषणम् नवाश्रयासवाङ्मल्पसमयासम
यादिकम् देवैर्देवत्वविषये सिद्धैः खेचर
सिद्धये पन्नगैरात्तसेमर्त्यैर्मुनिभिश्चमुमु
क्षुभिः कामिभिर्यमिभिश्चार्थलिप्सुभिस्से
द्र० वितोपरीं नवित्तव्ययवाङ्मल्पकायक्लेश
करं तपा यएतां चिंतयेन्मंत्री सर्वकामा
र्थसिद्धिदाम् तस्य हस्ते सदेवा सिद्धि सर्वसि सि०
द्धिं संशयः गद्यपद्यमयी वाणी सभायां

तस्यजायते तस्यदर्शनमात्रेणवादिनो
निष्प्रभतांदशाः राजानोपिहिदासत्वंभजं
तेकिंपौरजनैः अग्रेःशैत्यंजलस्तंभंगति
स्तंभंविवस्वतः दिवारात्रिव्यत्ययंचवशी
कर्त्तुंक्षमोभवेत् सर्वस्यैवजनस्यैहवल्ल
भःकीर्त्तिवर्धनः अंतेचभजतेदेवीगण
त्वंकुलेश्वरः चंद्रसूर्यसमोभूत्वावसे
त्कल्पायुतं दिवि नतस्यदुर्लभंकिंचि
द्योवेत्तिदक्षिणामिति अथातःसपर्यावि चौ॰
धिर्लिख्यते ब्राह्मेमुहूर्ते त्थायबद्धपद्मा
सनःसुधीः शिरस्यशुक्लवर्णसहस्रदल
कमलकर्णिकांतस्थचंद्रमंडलांतर्गत
हेमपीठोपरिनिजगुरुंशुक्लवर्णशुक्ला
लंकारभूषितंज्ञानानंदमुदितमानसंव
राभयकरंवामांगे [illegible] वामहस्त
स्थ॰ धृतोत्पलायाःप्रिययादक्षहस्तेनधृतचा सुरक्तया॰
रुकलेवरंशान्तेहिभुजंद्विनयनंदिव्याभि
षेकेनगुरुणासंप्रदायानुगतंकृतंना
मपूर्वकंगुरुंध्यात्वामानसोपचारैराग
ॐ॰ ध्य ऐंह्रींश्रींहसखफ्रेंहसक्षमलवरयूंस

स्त्रौः

प्रया हृत्कमलवपुर्ह्स्त्रौः श्रीअमुकानंदनाथश्री
मा० २ पादुकाममुकीदेव्यम्बाश्रीपादुकांपूज
३ यामिनमइतिदशापाविमस्त्रदंडवत्प्रणा पू०
3 मंभूमौकुर्यात् यत्र श्वेतांबरधरंगौरंश्वे
तामरणभूषितम् इत्यादिगुरुध्यानेन
हैसवविषयेबोद्धव्यम् शाक्तादौतु रक्त
माल्याम्बरधरंसरक्तपद्मवेष्टितम् इति
शारदाटीकाकारः प्रसन्नमनेनश्वेतव
र्णमपिगुरोर्ध्यानंतनरमलि शाक्तविष
येत्वस्माःकवचेलिखिष्यामि ज्ञानार्णवे
पि ब्रह्मरंध्रमहस्रारेकर्पूरधवलोग्रहवि
त्यादि अज्ञानतिमिरांधस्यज्ञानांजनशा
लाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगु
रवेनमः इतिनमस्कृत्यतदाज्ञांगृहीत्वा
मूलाधारस्यत्रिकोणांतर्गतायोस्तुस्वस्व
यंभूलिंगवेष्टिनीप्रसुप्तभुजगाकारां
सार्धत्रिवलयांतडित्कोटिप्रभांनीवारसू
कतन्वींकुलकुंडलिनींहुंकारेणत्रिकोण
मंडलाग्निनाचैतन्यंविधायब्रह्मरंध्रवर्त्म
नाहादशांतंनीत्वातत्रपरशिवेसंयोज्य

कुलगुरून्ध्यायेत् तडंके सहस्रारे महा
पद्मे स्वेतेशिरसि निर्मले पूर्णेन्दुमंडला
कारं शुद्धस्फटिकसन्निभम् गंधानुलेपि
तं शोणनेत्रं वराभयपाणिकम् मंदस्मित
निजगुरुं करुणाक्षावलोकितम् प्रिय
यादक्षहस्तेन धृतवाहुकलेवरम् वाम
हस्तोत्पलधारिण्या रक्तया सुशोभितम्
कुलार्णवे प्रानहस्यायमेवज्ञाब्रलरंध्रे
निजगुरुं स्मृत्वा देवीमयो भूत्वा नन्त्रभाय
टलारुणः तदंतरे प्रणवं वाचं [illegible]र्मया
लक्ष्मीबीजं समुद्धरेत् हसखफ्रें तथानंद
भैरवः सह खफ्रें गुरुना मतथाशक्तिना तथानन्द भैरवी
मश्रीपादुकां स्मरेत् एवमेवमहामंत्र
दशाधा प्रजपेत् कृती कालिकास्तुतो मू
लाधारे स्मरेद्दिव्यं त्रिकोणं तेजसां निधि
म् तस्याग्निशिखामानीयश्च पज [...]र्ध्वव
वस्थिताम् नीलतोयदमध्यस्थं तडिल्लेखा
वभास्वराम् नीवारशूकवत्तन्वी भास्कर
मंडलोपमाम् तस्याशिखायामध्येच य
रमोर्ध्वव्यवस्थिताम् सब्रह्मासशिवः

पुया. र. ५

4

सेंद्रः स एव परमः स्वराट् स एव विष्णुः स
प्राणः स कालोऽग्निः स चंद्रमाः इति कुंडलि
नीं ध्यात्वा सर्वपापैः प्रमुच्यते सर्वमहा
पातकेभ्यः पूतो भूत्वा सर्वमंत्रसिद्धिं कृत्वा
केवलं भैरवो भवतीति कुलचूडामणौ
मूलादिब्रह्मरंध्रांतं कुलं ध्यात्वा गुरुं स्मरे
त् प्रह्लादानंदनाथाख्यं सनकानंदमेव च
कुमारानंदनाथं च वसिष्ठानंदनाथकम्
क्रोधानंदं सुकानंदं ध्यानानंदमतः परम्
बोधानंदं सुरानंदं ध्यायेत्कुलमुखो परि
महारसरसोल्लासहृदयाघूर्णलोचनाः कु
ललिंगनसंभिन्नघूर्णिताशेषमानसाः कु
लशिष्यैः परिहृताः पूर्णान्तःकरणोद्यताः
वराभययुताः सर्वे कुलतत्त्वार्थवादिनः ए
वं कुलगुरून् नत्वा विसृज्य कुलमातृकाम्
कुलस्थाने समानीय स्नानार्थं तीर्थमाश्रये
त् पूर्णांते गुरुः कुले वत्स सप्त कुलमुखो वहम्
रहस्यमतुलं ते प्राक्षेगोमद्यपशुसंकटे कुल
नाथं परित्यज्य ये शंकाः कुलसेविनः तेषां
दीर्घ[illegible]यागस्य ह्यभिचाराय कल्पते तस्मा

त्सर्वं सप्रयत्नेन कुलीनं गुरुमाश्रयेत् कुली
नः सर्वविद्यानामधिकारी निगीयते दीक्षा
प्रभुः सप्रवात्मा सर्वमंत्रस्य पारगः स्वान्य
त्वष्टौ प्रकाशमानो प्रथमे प्रयाणे प्रति मू॰
प्रयाणेप्यस्तायमानो ऽप्रेतः पद्मामृतसं
चरंतीमानंदरूपामबलां प्रपद्ये इति प्र
हृदेवी न चान्योस्मि ब्रह्मैवाहं न शोकभाक्
सच्चिदानंदरूपेण स्वात्मानमिति चिंतये
त् प्रातःकृत्यं चावश्यकमेव निंदाश्रवणा
त् उक्तं च यामले प्रातःकृत्यमकृत्वा तुया
देवीं भक्तितोर्चयेत् तस्य स्याद्विफला पूजा
शैव हीनाय यथा क्रिया समुद्रमेखले देवि
पर्वतस्तनमंडले विष्णुपत्नि नमस्तुभ्यं
पादस्पर्शं क्षमस्व मे इति भूमिं विधाय नम
स्कृत्य शय्यातः समुत्थायाप्युनद्यादौ गत्वा
कालिकारूपं सर्वं विभाव्य स्वर्णरजतात्मि
को कुलदर्भमनामिकातर्जनीषु धृत्वा व
स्य मूलं स्मरन्मलापकर्षणस्नानं कुर्वाव
स्य ॐ अद्येत्यादिकुलदेवस्य प्रीतये मंत्र
स्नानमहं करिष्ये इति संकल्प्य विधाय यज

श्रूपा॰ २॰ ५

ले त्रिकोणचक्रं विलिख्य सूर्यमंडलादंकु
शमुद्रयातीर्थमावाह्य मूलेन ते आत्मतत्त्वा
य स्वाहा विद्यातत्त्वाय स्वाहा शिवतत्त्वा
य स्वाहा इत्याचमेत् अथवा ह्रीं स्वाहा इ
ति त्रिधाच[म्य] आत्मानं त्रिःप्रोक्ष्य मूलेन
म [मृ]त्तिकयोगलेपनं कृत्वा मूलं पठन् ॐ म
मुद्रयात्रिर्जलमभिषिंच्य अंगुलीभिः श्रु
वणादीनि सप्तच्छिद्राणि संरुध्य त्रि[ः] नि
मज्जेत् तदुक्तं कुमारीतंत्रे रक्तकृष्णानपि
संत्यक्त्वा ततो गत्वा जलांतिकम् मलाप
कर्षणं स्नात्वा मंत्रस्नानं समाचरेत् वि
धया त्रिर्निमज्ज्यैवमाचमेत्पयसा तथा कु
लद्रुममणौ कृष्णरक्तहरिन्नीलाविवि
धामसमूर्तये: नवत्यः कुलजः शिष्यः
पूं सन्नद्धंपरास्त[?]न् दिवं सर्वामथो वी
चपातालेभूतसंभवम् प्रावोत कुलद
र्भेण सदर्भकुलखंडूकः कुलपात्रे सह
ज्यं वौ[?]सतिलं सजलं ततः गृहीत्वा कुल
देवस्य प्रीतये स्नानमाचरेत् कृतसंकल्प
एवासौ कुलचक्रे जलेन्यसेत् कुलस्नाना

त्समानीयकुलमुद्रांक्रमेणच कुलतीर्था
नितत्रैवसमावाह्यशिवात्मकम् तत्रायं
चविद्यापीत्वाविद्याचप्रोक्षणंततोः अंकु
शमुद्रायथाज्ञानार्णवे मुष्टिंबद्ध्वादक्षक
रतर्जन्यंकुशरूपिणी अंकुशाख्यामहा
मुद्रात्रैलोक्याकर्षणक्षमा तीर्थावाहन
मन्त्रोयथा श्रीक्रमसंहितायाम् गंगेच
यमुनेचैवगोदावरिसरस्वति नर्मदेसि
न्धुकावेरिजलेस्मिन्सन्निधिंकुरु अथस
ङ्केतेपि मूलंपठन्मूर्ध्नितोयंमुद्रयांकुश
संज्ञयात्रिस्त्रावारत्रयंदेविश्रावयेत्साध
काग्रणीः आत्मविद्याशिवैस्तत्त्वैस्ततो
यागगृहेविशेत् अंकुशमुद्रायथाज्ञाना
र्णवे दक्षांगुष्ठेपरांगुष्ठंतिस्वामुष्टिहृदये
तत्र सावकाशंचैवमुष्टिःअंकुशमुद्राविबु
द्धयाः अन्यत्रापि नवछिद्राणिसंरुध्य
ततोमज्जेत्त्रिधासुधीः आत्मविद्याशिवै
स्तत्त्वैराचमेत्साधकाग्रणीः वह्निजायांप
ठेदस्माष्टेनपयसाप्रिये अथ ॐमणि
धरिवज्रिणिमहाप्रतिसरेरक्षरक्षहूंफट्

प्रपा. १. ८

इति शिखाबन्धनम् मूलेन तिलकं च कृत्वा
पूर्ववदाचम्य वैदिकीं सन्ध्यां विधाय तान्त्रि-
कीं सन्ध्यां कृत्वा तर्पणं कुर्यात् तत्क्रमं कु-
मारीतन्त्रे प्रणवं पूर्वमुद्धृत्य समन्ते च यथाशि-
ति च वह्निजायेति पदं प्रोक्तं महाप्रतिसरेन-
ष्ठा रक्षद्वयं ततो हुं फट् स्वाहा च तदनन्त-
रम् अनेनैव च मन्त्रेण रक्षां कुर्याद्विचक्षणः
रक्षणमिति शिखाबन्धनरूपेण वस्त्राञ्चले
ग्रन्थिं वा कुर्यादित्यर्थः शारदाटीकायाम्
उक्तेनैव प्रकारेण कृत्वा स्नानं च तान्त्रिकम्
वैदिकीं तान्त्रिकीं सन्ध्यां कृत्वा तर्पणमाचरे-
त् तान्त्रिकीं सन्ध्यां यथा तत्रैव पुनराचम्य
विन्यस्य षडङ्गमिति मन्त्रवित् वामहस्ते ज-
लं गृह्य गालितोदकबिन्दुभिः सप्तधाप्रोक्ष-
णं कृत्वा मूर्ध्नि मन्त्रमनुस्मरेत् अवशिष्टो-
दकं हस्ते दक्षे संगृह्य बुद्धिमान् इडयाकृ-
ष्य देहान्तः क्षालितपापसञ्चयम् कृष्ण-
वर्णं तज्जलं दक्षनासाविरेचयेत् दक्षह-
स्तेन तन्मन्त्री पापरूपं विचिन्त्य च पुरतो
वज्रपाषाणे प्रक्षिपेद् अस्त्रमन्त्रतः अस्मात्रा

ति षडङ्गन्यासं समाचर्य वामहस्ते जलं ततः
गृहीत्वा दक्षिणेनैव संपुटं कारयेत्ततः शि-
ववायुजलपृथ्वीवह्निबीजं त्रिधा पुनः अ-
भिमन्त्र्य मूलेन सप्तधा तत्त्वमुद्रया निक्षिपे-
त्तज्जलं मूलं मूर्ध्नि प्रोक्ष्य निधाय च शरीरान्तः
स्थितं पापं ज्वालयेत्स्वायकाग्निभिः ततो ह-
स्तौ प्रक्षाल्य ॥ अथात्र प्रयोगः पूर्ववदाचम्य
षडङ्गन्यासं कृत्वा वामहस्ते तज्जलं निधाय
दक्षहस्तेनाच्छाद्य हं यं वं लं रं इति त्रिरभिमं-
त्र्य मूलमुच्चरन् गलितोदकबिन्दुभिस्तत्त्व-
मुद्रया मूर्ध्नि सप्तधा प्रोक्षणं कृत्वा शेषजलं
दक्षहस्ते समादाय तेजोरूपं ध्यात्वा इडया
देहान्तः पापं प्रज्वाल्य कृष्णवर्णं पापरूपं
तज्जलं पिङ्गलया विनिःसृत्य कल्पितवज्र-
शिलायां फडिति निक्षिपेत् इति ततो ह-
स्तौ प्रक्षाल्याचम्य जले यन्त्रं ध्यात्वा सव-
ितृदेवतामावाह्य पेशामां पंक्तीं अष्टका-
नेनाश्च भेर वस्त्रप्रतानिति त्रिः सङ्कल्प्य
मर्घ्योदकेन सन्तर्प्य वह्नीं परमगुरूनेव
सं परमाचार्यगुरून् तर्पयेत् इति सन्ध्या

पू. २७

ततोहस्तेर्घपात्रस्याग्रंहृत्तर्पयेद्यथा श्रीमग
कानन्दनाथभैरवस्तृप्यताम् इति त्रिः सकृ
द्वा दिव्यसिद्धमानवौघगुरूंस्तर्पयेत् त
तो देवीं तर्पयेद्यथा जले यन्त्रे विभाव्य त
त्र देवीमावाह्य स्वाहान्तमूलेन महाकाल
सहितां श्रीदक्षिणकालिकामातां तर्प
तामिति सन्तर्प्य पञ्चैकाञ्जलिना परिवा
रान्सन्तर्पयेत् तदशक्तौ सायुधसवाहन
सपरिवारमहाकालसहितश्रीदक्षिण
कालिकामातां तर्प्यतामिति त्रिः सन्तर्प्य
देवीं ततो रक्तचन्दनजपापुष्पादिनार्घ्यं नि
धाय ह्रीं हंसः कुलमालिने भैरवाय प्रका
शशक्तिसहिताय इदमर्घ्यं स्वाहा इति त्रिर
र्घ्यं कुलसूर्याय दत्वा सूर्यमण्डले देवीं विभा
व्य एवं वदर्घ्यं कृत्वा देवीगायत्रीमुच्चार्य
इदमर्घ्यं महाकालसहितायै दक्षिणका
लिकायै स्वाहा इत्यर्घ्यं दत्वा गायत्रीं यथा
शक्ति प्रजप्य देवीहस्ते समर्पयेत् ततः कु
कुलवृक्षमालां कुलसूर्याय दत्वा त्रिरर्घ्यं
परिकल्प्य च देवान्पितॄन्ऋषींश्चैव तर्पयेत्

कुलवारिणा नन्दिकेश्वरसंहितायां च याव
न्न दीयते चार्घ्यं भास्कराय निवेदितम् ताव
च्छिवं शङ्करं वा गणेशं वा महेश्वरीम् इति
अन्यत्रापि तर्पणादौ प्रवृत्ते तत्पत्नीं ब्रह्म
भैरवः आवाहने स्वपितृस्थभैरवानिति की
र्तयेत् तत्र भैरवरूपेण देवीमपि च कालि-
काम् तत्पत्नीं कालिकामातापिताभैरव
तत्पत्नीनाम् एवमेव विधानेन यथाशक्त्यापि
तर्पयेत् मातामहभैरवायेति त्रिधा चार्घ्यं प्र
कल्पयेत् तत्रान्तरेऽपि दिनेशायोत्क्षिपेत्त्रि
स्वारिणा चाञ्जलित्रयम् अष्टोत्तरशताष्ट
सा गायत्रीं प्रजपेत्सुधीः ततोऽर्कं च तत्रैव विम
र्शिन्याम् सूर्यमण्डलवासिन्यै देवतायै नमः
इममञ्जलिमादाय गायत्र्या त्रिरुत्क्षिपेत्
यथाशक्ति जपेद्देवीं गायत्रीं तदनन्तरम् गा
यत्री यथा कुमारीतन्त्रे कालिकायै पदं प्रो-
च्य विद्महे तदनन्तरम् श्मशानवासिनीं ङे-
न्ते धीमहीति ततो वदेत् तन्नो घोरे पदं प्रोक्तं
प्रचोदयात्पठेदिति अस्याः प्रसादमात्रेण म
हापातककोटयः सद्यः प्रलयमायान्ति सा

पुण·
२·
८
8

यकस्मनवामथा रावणस्यवधाद्देवरामच
ह्मविमोचितः निजकर्माकर्षणाद्ब्रह्मणाचै
वविमोचितः मातृवधात्परशुरामोमोचि·
तोस्याः प्रसादतः सुरापानाद्बृहस्पती कुम्भोद
न्नोत्रघस्तथैवच एवमेषामहाविद्यागोप
प्याभुविसुन्दरि महापातकयुक्तोपिप्रजपे
द्दशाध्यायषट् सत्यंसत्यंमहादेवि मुक्तोभव
तितत्क्षणात् अथकुलचूडामणौ उत्थाय
कुलवस्त्रेहे परिधायकुलेनच तिलकंकुल
रूपंचकृत्वाचमत्कुलेश्वरि मोक्षार्थीरक्त
वस्त्रेष्ठ भोगार्थीश्वेतवाससी मारणेकृष्ण
वासस्तुवश्येपीतकंसदादृष्टी उच्चाटनेधूम्र
चमिवृत्तत्वकस्तंभकर्मणि परिधायततो
मंत्रीयागभूमिमथाविशेत ततश्चसाधक
श्रेष्ठोहृदिमंत्रपरामृशन् अवहिर्मानसो
योगीयागभूमिमथाविशेत् जलपात्रंवक
रेकृत्वागत्वाद्वारिमहेश्वरि एतत्स्मरतंमस्था
नेसमाश्रित्यशिवंजपेत् तालयेत्स्वपादे
चवस्त्रमाणेनवर्त्मना कुमारीकल्पपि व
ग्रोदकिंकुफट्स्वाहामंत्रेणमंत्रवित् जल

मानीयसमेतमाचमनं शोधयेत्ततः प्रणवं सं
वेष्टु हुं मलज्ञा बीजं तत्रैव च ततो विष्णुहस्तेन
सर्वपापानि शमयेत्ततिच अशेषान्तविकल्पं
स्पाटपनीयतत्तत्सरम् कूर्चबीजं भवेन्मंत्रं
पादप्रक्षालनं प्रिये यागस्थानानि यथा
तदूर्ध्वं फेत्कारीये एकलिङ्गे श्मशाने वाष्टु
मागारे च तत्पृष्ठे मंत्रज्ञः साधयेद्योगी वि
शांतिभवतारिणीम् पंचक्रोशान्तरे यत्र न
लिङ्गान्तरमीक्षते तदेकलिङ्गमाख्यातं तत्र
सिद्धिरनुत्तमा श्मशानाच्चापि उद्याने पर्वते वापि
निर्जने वा च तत्पृष्ठे देवागारे देवभूमे वि·
ल्वमूले नदीतटे शून्ये निर्जनारामे तथा वा
प्यस्य सन्निधौ एतेषामन्यतं संस्थानमाश्रि
त्य ॐ वज्रोदकि हूं फट् स्वाहा अनेन जलेन स
मानीयमाचमनमभ्युदय उपविश्य ॐ ह्रीं वि
शुद्ध सर्वपापानि शमय अशेषं विकल्पम
पनय हूं अनेन हस्तौ पादौ प्रक्षाल्य एवं व
दाचम्य सामान्यार्घ्यं कृत्वा गृहदेवताः पूज
येत् तदूर्ध्वं तत्रान्तरे तत्र आचमनं कृत्वा
सामान्यार्घ्यं निवेदयेत् त्रिकोणं वृत्तमभ्यु

प्पा॰ २॰ ९

विंबमण्डलं रचयेत्ततः आधारशक्तिं संपूज्य
तत्राधारं विनिक्षिपेत् अस्त्रेण पात्रं संशोध्य॰
श्रीं हृन्मन्त्रेण पूरयेत् निक्षिपेत्तीर्थमावा
ह्य गन्धादीन्मूलेन ततः दर्शयेद्धेनुमुद्रां वेसा
मान्यार्घ्यमिदं स्मृतम् सामान्यार्घ्येण देवंप्रि
पूजयेद्द्वारदेवताः येनमुद्रा यथा अ सोमा॰
भिमुखं विश्लिष्टकनिष्ठानामिका ९ नः तथा
वतर्जनीमध्या येनमुद्राऽस्मृतप्रदा द्वारदेव
ताः यथा वटुकं सरस्वतीं च गणेशं क्षेत्रपालं च
वटुकं योगिनीं ततः गङ्गां च यमुनां चैव ल
क्ष्मीं वाणीं च पूजयेत् कुमारी कलशेपि गा
दौ जांग्रं गणेशं च वामाग्रं वटुकं तथा क्षमा
ग्रं क्षेत्रपालं च याम्याग्रं योगिनीं तथा ऊर्ध्वं
वामे दक्षिणे च अर्थः श्चैव प्रकीर्तितम् अथ
पूजाप्रभेदी यथा द्वारो श्रीगणेशाय नमः
वामे क्षं क्षेत्रपालाय नमः दक्षिणे वां वटु
काय नमः अधः यां योगिनीभ्यो नमः एवं
गां गङ्गायै नमः यां यमुनायै नमः श्रीं ल॰
क्ष्म्यै नमः ऐं सरस्वत्यै नमः इति पूर्वादिद्वा
रचतुष्टये संपूज्य वामाङ्ग॰ संकोचेन गृह

प्रविश्य नैरृत्यां ब्रह्मणे नमः वास्तुपुरुषा
य नमः इति संपूज्य अक्षततिलसिद्धार्थैर्भू
तान्संत्रासयेत् तत्रमंत्रस्तंत्रे भूमिष्ठा ये स
स्थितान्विघ्नान्विघ्नहेतून्संहराततैः सिद्धा
र्थैस्तिलसम्मिश्रैः प्रोक्षार्घ्यचासने विशेत्
अन्यत्रापि भूतापसर्पणं कुर्यान्मंत्रेणाने
न साधकः स्थितेष्वत्र भूतेष्वनैवेद्यं स
ण्डले तथा विलंपन्ति सदा लुब्धा नतस्य
न्ति देवताः तस्माद्यत्नेन कर्तव्यं भूतानाम
पसर्पणम् कुमारकल्पेपि प्रणवं सर्वमुद्दि
श सर्वविघ्नांस्ततः परम् उत्सारय ततो हुं
फट् स्वाहा च तदनन्तरम् अनेनैव च मंत्रेण
विघ्नानुत्सारयेत्ततः ॐ सर्वविघ्नानुत्सार
य हुं फट् स्वाहा इत्यनेन सिद्धार्थाक्षतति
लैर्नाराचमुद्रया भूतापसर्पणं कृत्वांगुष्ठ
निःसृतजलेन भूमिशोधनं कुर्यात् ॐ रक्ष र
क्ष हुं फट् स्वाहा अनेन भूमिमभिमंत्र्यास
नं संस्थापयेत् तत्रमंत्रः कुमारीकल्पे प्रण
वं सर्वमुद्धृत्य रक्षार ततः परम् हुं फट्
स्वाहेति मंत्रेण भूमिं च परिशोधयेत् ततः

पूपा॰
२॰
१॰
10

पवित्रवज्राद्दोषप्रणवं पूर्वमुच्चरेत् वर्मद्वयं
ततश्चैव फट् स्वाहान्ततदनन्तरम् अनेनैव च
मंत्रेण कुर्यादभ्युक्षणमभिमंत्रणम् अथासना॰
नि यथा मृदुतूलकमासीत स्वास्तेषु को
मलेषु वा विष्टरेषु समासीनः साधयेत्
सिद्धिमुत्तमाम् मृदादिलक्षणमाह अ॰
वीक्षणमासतो गर्भच्युतमाकृष्टं तु यथाः
च्युतोपनयनहीनं मृतं वा च्युतकं विदुः नि
हतं च च्युतकं कर्णहीनोपनयनः पुमान् यो
मृतः पंचमे वर्षे तमेव कोमलं विदुः स
तत्रापि कंबलं लोहितं वापि कृष्णं वा व्याघ्र
चर्माणि सन्यासी ब्रह्मचारी च कृष्णसार
स्य चर्माणि अन्यत्रापि कृष्णसारं हि पंचमि
श्रुतं कंबलं तथा पीतवर्णं च शुक्लं वा आ
सनाय प्रकल्पयेत् अत्र मत्तासनमावपण
कमेव तत्कारणं प्रमवायः श्रूयते तउ
क्तं मुण्डमालातंत्रे व्याघ्राजिने सर्वसि
द्धिः स्यान्मोक्षसिद्धिर्मृगाजिने वस्त्रासनं रोगह
रं वेत्रजं श्रीनिवर्धनम् कौशेयं पुष्टिदं प्रो
क्तं कंबलं सर्वसिद्धिदम् शुक्लं वा यदि कृ

स्यं वा विशेषाद्रक्तकंवलम् मृदुकोमलमा
स्तीर्य संग्राममपतितं च यत् जन्तुमापादितं
वापि मृदुं वानरमासनम् गर्भच्युतवत्सं वापि
नारीणां योनिजं त्वचम् सर्वसिद्धिप्रदं देवि
सर्वभोगसमृद्धिदम् त्वचं वा पीठवनस्थानं ता
कुर्यात्ह्रीरोमृतासनम् श्मशानकाष्ठघटितं
पीठं वाय ज्ञदारुणम् नदीस्थितो विशे[?]ज्ञा
त्वक्छस्म शशाराजिने शृङ्गी यतस्थिताप्रसवा
यः भूमौ त्रिकोणमालिख्य धारशक्त्याप्रपूज
नम् मेरुपृष्ठऋषिः प्रोक्तः सुतलं छन्द ईरि
तम् कूर्मोऽत्र देवता चैवमासनारोपणे प्रिये
विनियोगस्तु कथितः पठेद्धृत्वासनं ततः
पृथ्वि त्वया धृता लोका त्वं देवि विष्णुना धृता
त्वं च धारय मां लोके पवित्रं कुरु चासनम् इति
धृत्वा तु देवेशि कुशं पत्रेष्वेव दापयेत् माया
वीजं समुच्चार्य आधारशक्तिमर्चयेत् कम
लासनमालिख्य तुं. नमोन्तं प्रपूजयेत् कूर्मा
रीकल्पेपि ॐकारान्ते स्थिरे त्विच वज्रे रवित
नःपाम् कुफट्स्वाहेति कुर्यात्तु मण्डलं वशा
वासने वीरासने नोपविशेत्संपूज्यासनमेव

पुपा·
२·
॥
१२

च अथ प्रयोगः आसनोपरि कुशास्तरणं दत्वा
ह्रीं आधारशक्तिकमलासनाय नमः इति संपू
ज्य अः हरे खे वज्ररे खे हूं फट् स्वाहा इति मण्ड
लिकां कृत्वा तदुपरि एवं विधिनासनं संस्था
प्य पद्मस्वस्तिकवीरासनाद्यन्यतमासनेनो
पविश्य कामाख्याभिमुखो विजयां स्वीकुर्यात्
तदुक्तं भावचूडामणौ विना हेतुकमास्वाद्य
नोभयुक्तो महेश्वर न पूजां मम संकुर्यान्न ।
ध्यानं न विचिन्तनम तस्माद्भुक्त्वा चर्वणीया च
पूजयेत्सुरमेश्वरीम् विजयाकल्पेपि संविदा
सर्वयोगमध्येषु संविदेव गरीयसी संवित्प्रयोग
लेनादौ पूजाद्याः साधकोत्तमैः कर्त्तव्या महा
पूजाकरणीयास्तु विन्दितेति अन्यत्रापि आ
नंदेन विनाभ्रंशो न च तत्प्राप्तिर्देवतेरिति त
स्माद्विजयास्वीकारो वश्यं पूजादौ कर्तव्यः
सा तु नश्वरवर्णाद्ब्राह्मणी क्षत्रिया वैश्या शूद्रा
च श्वेतरक्तपीतकृष्णपुष्पभेदात् तासां शुद्धिः
क्रमेण लिख्यते तदुक्तं विजयाकल्पेपि सं
विदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे भैरवा
णां च तत्त्वार्थं पवित्रा भव सर्वदा ॐ ब्राह्मण्ये

नमः स्वाहा इति शोधयेत् सिद्धमूलस्य दोषे
द्विविहीनबोधप्रबोधिनि राजप्रजावशंक
रि शत्रुमत्तनिसूदिनि पंचत्रिधायै नमः
स्वाहेति मंत्रेण शोधयेद्वरं ततः अन्ने
स्यन्दी स्वान्ते हानाग्निवह्निरूपिणि श्रोनन्द
स्वाकृतिं प्रीतिं समस्य ज्ञानं प्रपञ्चमे ह्रीं वै
ष्णव्यै नमः स्वाहा शोधयेत्तदनन्तरम् नम
स्वामि नमस्वामियोगमार्गप्रदर्शिनि त्रैलो
क्यविजये मातः समाधिफलदा भव क्लीं पु
ष्ट्यै नमः स्वाहा कथितं मंत्रमुत्तमम् ॐ अ
मृते अमृतोद्भवे अमृतवर्षिणि — पदं ततः
अमृतमाकर्षय यन्त्रसिद्धिं देहि ततः परम्
अमुकं मे रति वृयाहृशमानय ततः परम्
ठि ठ न्तोयं म नुः प्रोक्षयन्तस्स्वर्णावशोधने
उत्तरा तत्रैव मूलमंत्रं मन्त्रवारं तस्योपरि नि
योजयेत् आवाहनादि कुर्यात् अस्य देवतानी
ततः परम् दिव्यस्रोटिकाभिस्तु तालत्र
यत्र तः परम् दिव्यहस्तान्तथापार्श्विद्याते
किञ्चित्विज्ञातयेत् समस्थानर्पयेद्धलरत्ये
मूलं गुरोर्जपन् देवीपद्मे सहस्रारे तथा सं

पूया. २. १२

12

केतमुद्रया त्रिधैव तर्पयेद्ब्रह्मा साधकः सि
द्धिमानसः ऐं वद वद्रूपाह्वाग्वादिनि पदं त
तः मम जिह्वाग्रे स्थिरीभव सर्वेति च पदं ततः
जनवशंकरि स्वाहा मंत्रेण जुकुर्यात्सुवे
संकेतमुद्रया तत्वमुद्रयेत्यर्थः एवं विधिना
विजयां स्वीकृत्यानन्दमयो भूत्वा वामकर्णो
र्ध्वे श्रीअमुकानन्दनाथगुरुपादुकाभ्यो न
मः दक्षकर्णोर्ध्वे गं गणपतये नमः मध्ये
इष्टदेव्यै नमः इति नमस्कृत्य पूर्ववत्स्वात्मा
मार्द्रीकृत्वा तेनोदकेन पूजोपकरणं स
प्रोक्ष्य स्वदक्षिणे गन्धपुष्पादिकं वामे स्वग
न्धिजलं देवताग्रेः पश्चिमे कुलद्रव्याणि अ
मत्रान्नं च वामे धार येत् तदुक्तं कुलमूला
मणे कुलासनं ततः स्थित्वा तदभ्यर्च्य या।
यासत्वम् कुलासनं ततो वद्धा गुरुपूजा
क्रमेणैव आत्मशुद्धिं भूतशुद्धिं देहशुद्ध्या
दि भैरव कृत्वा चार्च्चनं ततो विद्वान्कुर्यात्कु
लविचेष्टितम् दीक्षिताभिः कुलीनाभिर्यु
वतीभिः कुलात्मभिः देवतां गुरुभक्ताभिः
संचिंतयागभूमिषु नानाविधानि पुष्पाणि

गन्धानि विविधानि च कर्पूरजातिपुष्पादिवा-
सितं पटवासितम् तांबूलं च यद्द्रव्यं च धूपदी
पादिकं च यत् सर्वालंकारभूषाभिर्भूषितः
कौलिकेश्वरः मूलमन्त्रमतोयैः प्रोक्षितं
स्थापयेत्ततः सर्वं स दक्षिणे स्थाप्य वामे वा
ऽपि निवेदयेत् पश्चिमे देवतायाश्च कुलद्रव्या
णि धारयेत् पश्चिमेष्टेष्टेरमर्घ्यः कालिकापु
राणेपि मदिरां पृष्ठतो दद्यादन्यत्सर्वं च वामतः
कुमारीकल्पेपि अधिष्ठाने लघुध्यस्य प्राणं वपु
र्वै गृह्णीत शताभिषेकेति पदं शताभीति ततः
परम् षेकेति च पदं श्रों क्रों हुं फट् स्वाहा ततः पं
प्राणं वपुष्य केन स्वराजा हेति पदं ततः शताय पे
मध्यगिन्स्त्रक्रां नगवद्धा यञ्जमिति पुष्पपुष्पेम
हापुष्पे सपुष्पे पुष्पसंभवे पुष्पस्रवयावकी।
णीं हूं फट् स्वाहा ततः परम् विशुद्धपुष्पमातेति
नं लघुवं वदाहरेत अथवा मध्यमिकानतं यप्त
मौ दत्वा तर्जनीमध्यमाभ्यामङ्गुष्ठेन ता तत्र यत्न
तः सं गृह्य योगे नक्षोटिकाभिर्दशदिग्बन्धनं कृत्वा
दिव्यदृष्ट्यादिमन्त्रिकान्विरस्यावलोदिन्वह्नि
प्रकारं विचिन्त्य प्राणायामत्रयं कुर्यात् ।।

तदुक्तं स्वतंत्रे

प्रा० ३ १३

13

पार्ष्णिघातकरास्फोटसमुद्भवितचक्रकैः
तालत्रयमथोद्घात्सशब्दं सप्रदायतः स्तन
वन्हेनैत्ररामेरसैर्वेदादिकैः प्रिये मात्राभिः
प्रणवं जप्त्वा पूरकुंभकरेचकैः प्राणायामत्र
यं [illegible] कृत्वा भूतशुद्धिं ततस्स्मरेत् अन्यत्रापि
मनोजीवात्मनोः शुद्धिः प्राणायामेन जायते
कालीतंत्रेपि प्राणायामत्रयं कुर्यान्मूलेन प्र
णवेन वा ज्ञानार्णवेपि कनिष्ठानामिकांगु
ष्ठैर्यन्नासापुटधारणम् प्राणायामः स विज्ञे
यस्तर्जनीमध्यमे विना मात्राभिः प्रणवं ज्ञा
त्वा पूरकुंभकरेचकैः प्राणायामत्रयं कृत्वा भू
तशुद्धिं ततस्स्मरेत् तत्रायं क्रमः मूलाधारे मनः
संयोज्य दक्षांगुष्ठेन दक्षनासापुटं धृत्वा मूलमं
त्रं प्रणवं वा षोडशवारं जपन् वामेन वायुमापू
र्य कनिष्ठानामिकाभ्यां वामनासापुटं विधृत्य म
न्त्रमेव चतुःषष्टिवारं जपन् वायुं रेचयेत् एवं
क्रमोपक्रमेणावासत्रये कृते एकः प्राणाया
मो भवति एवं वारत्रयं कुर्यादिति अथ मूलाधा
रात्कुण्डलिनीं हंस इति मंत्रेण पृथिव्या सह स्वा
धिष्ठाने समानीय तत्र जलं पृथिवीं लीनां वि

हि

भाव्य तस्माज्जलेन सह मणिपूरे समानीय त
त्रस्थवह्नौ जलं विलीनं विचिन्त्य तस्माद्वह्नि
हृ ना सहानाहते समानीय तत्रस्थाकाशे वा
युं विलीनं विचिन्त्य तस्माद्वाकाशेन सह,
ज्ञाचक्रे समानीय तत्रस्थमनस्याकाशं वि
लीनं कृत्वा मनो नादे विलीनं विभाव्य बिन्दौ
ध्वनिं समर्पयेत् ततः सहस्रदलकमलक
र्णिकान्तस्थचन्द्रमण्डलमध्यगतत्रिको
णान्तर्गतबिन्दुरूपपरमशिवे तं समर्प्य
प्राणायामविधिना यमिति वायुधूम्र बीजं
वर्णं जपन् शरीरं संशोष्य रमिति वह्निबी
जं रक्तवर्णं वह्नेः षष्टिवारं जपन् शरीरं कायस
न्दह्य वमिति बीजं शुक्लवर्णं सहस्रारे विचि
न्त्य द्वात्रिंशद्वारं जपंस्तदुद्भवामृतवृष्ट्याभि
प्लाव्य शरीरमुत्पाद्य ललाटस्थ लमिति पृथि
वीबीजेन पीतवर्णेन शरीरं सुदृढं कुर्यात् सो
ऽहमिति मन्त्रेण कुण्डलिनीममृतलोलीभूता
पञ्चभूतानि जीवात्मानं च व्यत्ययेन स्वस्व
स्थाने नियोजयेत् ततो देवीरूपमात्मानं वि
भाव्य हृदि जीवमात्मं कुर्यात् तद्हस्तेने यथा

प्रा·
१·
१७

आं ह्रीं क्रों हंसः श्रीदक्षिणकालिकायाः प्रा-
णा इह प्राणाः अमुष्या जीव इह स्थितः अमु-
ष्याः सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्रघ्रा-
णप्राणादीनि इहागत्य सुखं चिरं तिष्ठन्तु स्वा-
हा इति जीवं न्यसेत् तदनु संहतं तत्र संहार
क्रमयोगेन पञ्चतत्वसमुत्करेत् शोषदा-
हप्लावनं कृत्वा वाय्वग्निसलिलात्मकैः ततो
न्यासं प्रकुर्वीत फेत्कारीतन्त्रेरितम् अत्र
अपि देवीरूपं ततो ध्यायेदात्मानं कमलेक्ष-
णे ततो बीजं प्रविन्यस्य पाशादित्रितयेण च
प्राणमन्त्रेण युक्तेन ततो मुष्याः पदं ततः प्रा-
णा इति वदेत् पश्चादिह प्राणास्ततः परं अमु-
ष्या जीव इह स्थितो मुष्याः पदं ततः सर्वेन्द्रि-
याण्यमुष्याश्च वाङ्मनो नयनानि च श्रो-
त्रघ्राणपदात्प्राणा इहागत्य सुखं चिरम्
तिष्ठन्तु वह्निजायान्तः प्राणमन्त्रोयमीरितः
प्रकारान्तं च ज्ञानार्णवे विपरीतप्राणम-
न्त्रविलिखेन्न्यासपूर्वकं प्राणप्रतिष्ठामन्त्रो-
यं सर्वकर्माणि साधयेत् अस्य मन्त्रान्ते अमु-
ष्या जीव इति वोद्धव्यम् अमुष्या इत्यमुष्या

19

स्थानेसाध्यदेवतानामपदं षष्ठ्यन्तंप्रयोक्त
व्यम् तदुक्तंनारायणीये अमुकपदं यद्रूप
यत्रपदे श्रूयते साध्याभिधानंतद्रूपत
त्रस्थानेनियोजयेत् इति कुमारीकल्पे
पि भूतशुद्धिं विधायेत्यं देवीरूपेणचिन्त
येत् प्रणवंपूर्वमुद्धृत्य अस्त्रमितिचपदंत
तः हुंफट्स्वाहामन्त्रः प्रोक्तः कायवाक्
चित्तशोधने रक्तं हुंफट् ततःस्वाहामन्त्रः
स्यादात्मरक्षणे एवंभूतशुद्धिंकृत्वा ॐ
अंकुंफट्स्वाहा इतिमन्त्रेणकायवाक्चि
त्तानिसंशोध्यरक्तंहुंफट्स्वाहा अनेनहृ
दिहस्तंदत्वा आत्मरक्षांविधायस्ववामेशा
क्तिंसंस्थाप्यप्राणायामादिकंकुर्यात् त
दुक्तंकुमारीकल्पे ततःषोडशवार्षिकीं ना
रीमानीयमन्त्रवित् युवतीमदनोन्मत्तां
स्ववेशांचारुहासिनीम् सदारतेसाभि
लाषांसिन्दूरांकितमस्तकाम् साधकश्च
यसत्पत्नीवामेसंस्थापयेद्बुधः तस्यास्तुभू
तशुद्ध्यादिकृत्वावैमातृकांन्यसेत् प्राणा
यामंततः कृत्वाकारयित्वायथाविधीति

श्या॰
१॰
१५

15

अथ ऋष्यादिन्यासं कुर्यात् यथा अस्य श्री
दक्षिणाकालिकामन्त्रस्य भैरव ऋषिः उ-
ष्णिक् छन्दः श्रीदक्षिणाकालिकादेवता
ह्रीं बीजं हूं शक्तिः क्रीं कीलकम् मम चतु-
र्वर्गसिद्ध्यर्थे विनियोगः इति कृताञ्जलिः
संकल्प्य शुद्धेन कायेन वाचा मनसा वा।
न्यसेत् यथा भैरवऋषये नमः शिरसि
उष्णिक् छन्दसे नमो मुखे श्रीदक्षिणाका-
लिकादेवतायै नमः हृदि ह्रीं बीजाय नमो
गुह्ये हूं शक्तये नमः पादयोः क्रीं कीलका-
य नमः सर्वाङ्गे तदुक्तं कालीतन्त्रे भैरवोऽस्य
ऋषिः प्रोक्त उष्णिक् छन्द उदाहृतम् देव-
ता कालिका प्रोक्ता लज्जाबीजं तु बीजकम्
शक्तिश्च कूर्चबीजं स्यात् निरुद्धं सरस्वती
कवित्वार्थे प्रयोगः स्यादेवमृष्यादिकल्पना
कीलकं वाग्बीजं तु क्रमेण विन्यसेत् प्रिये
ऋषिं न्यसेन्मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे
देवतां हृदये चैव बीजं तु गुह्यदेशके श-
क्तिं तु पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत्
अथ करन्यासाङ्गन्यासौ कुर्याद्यथा ॐ क्रां

ङ्गुष्ठाभ्यां नमः ॐ क्रीं तर्जनीभ्यां स्वाहा ॐ
क्रूं मध्यमाभ्यां वषट् ॐ क्रैं अनामिकाभ्यां
हुम् ॐ क्रौं कनिष्ठिकाभ्यां वौषट् ॐ क्रः क
रतल अस्त्राय फट् इति करन्यासः अथां
गन्यासः ॐ क्रां हृदयाय नमः हृदि तर्ज
नीमध्यमानामिकाभिर्न्यसेत् ॐ क्रीं शिर
से स्वाहा इति शिरसि तर्जनीमध्यमाभ्यां शि
रसि ॐ क्रूं शिखायै वौषट् इति शिखायां
मुष्टिबद्धाङ्गुष्ठेन ॐ क्रैं कवचाय हुं इति क
वचे हस्तद्वयाङ्गुलीभिः ॐ क्रौं नेत्रत्रयाय
वौषट् इति ॐ क्रः अस्त्राय फट् इति तर्ज
नीमध्यमाभ्यां ऊर्ध्वे तालत्रयं दत्वा दश
दिग्बन्धनं छोटिकाभिः कुर्यात् इत्यङ्गन्यासः
तदुक्तं वीरतन्त्रे दीर्घषट्कस्वजातेन प्रणवा
द्येन कल्पयेत् विशेषो यथा कालीतन्त्रे हृ
दयाय नमः पूर्वं शिरसे वह्निवल्लभा शिखा
यै वषट् प्रोक्तं कवचाय हुं ईरितम् नेत्रत्र
याय वौषट् स्यादस्त्राय फट् प्रकीर्तितम्
तन्त्रेपि प्रणवं वाग्भवबीजं वषड्दीर्घस्व
रभाजितम् कुर्यात् षडङ्गं विमांसमूलावि

श्रया॰
२॰
१८
16

त्रयेण वा अत्रप्रकारः मूलादिखण्डसप्तबी
जेन हृदयं द्वितीयखण्डनामार्णैः शीर्षम्
तृतीयखण्डेन नवबीजेन शिखां अथवाद्येन
खण्डत्रयेण पुनः प्रथमखण्डेन कवचं
द्वितीयखण्डेन नेत्रत्रयम् तृतीयखण्डेन
नास्त्रम् एवं विधिना त्रिः सकृद्वा षडङ्गन्या
सं मूलखण्डत्रयेण द्विरावृत्त्या वा कुर्यात्
तत्र क्रमेण वर्तेत षडङ्गानि न्यसेत् मंत्री त्रिः स
कृद्वा यथाक्रमम् अष्टवर्णान्यासं कुर्याद्य
था अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं नमः हृदये
न्यसेत् एं ऐं ओं औं अं अः कं खं गं घं ङं नमः
दक्षभुजे चं छं जं झं ञं टं ठं डं ढं णं नमः वाम
भुजे तं थं दं धं नं पं फं बं भं मं नमः दक्षजंघा
याम् यं रं लं वं शं षं सं हं ळं क्षं नमः वामजं
घायाम् ततो मातृकान्यासं कुर्यात् श्रीक
ण्ठादिन्यासं कुर्यात् तत्र क्रमेण ब्रह्मर्षि
र्गायत्री छन्दः आद्यो मातृका पुनः देवता
व्यञ्जनं बीजं शक्तयः स्वरास्तु शक्तयः अव्यक्तं
कीलकं ज्ञेयम् अस्य क्रमेण तु उक्तक
मेण पूर्वोक्तक्रमन्यासादिक्रमेणान्यसेत् अका

रेण समं कादिवर्गश्च श्रेष्ठमं मतम् तेषां तु
विन्दुसंयुक्तैर्लक्ष्यैरादेवैरिह अकारान्त
नष्टो स्वार्थं श्रेष्ठाभ्यां नमस्तथा प्रणव
मातृकामंत्रं मंत्रं सृष्टयन्तो न्यसेत इका
कारश्च वर्गेण दीर्घकारान्तगेन च नजे
त्रोयुगलं देवि न्यसेत् स्वाहान्तगेन तु उका
३८ रेण टवर्गेण ऊकारान्तेन सुन्दरि मध्यमा
युगलं सम्यग्वषडन्तेन विन्यसेत् एका
रादितवर्गेण ऐकारान्तेन हूंमन्त्रः सोमेट
नामिकायुग्मं नियतं तत्र भैरवि ओकार
श्च पवर्गेण औकारान्तेन शोधयेत् वौषड
न्तकनिष्ठाभ्यां विन्यसेत्कार्यसिद्धये अंका
रादियवर्गेण शवर्गेण तु संयुते अः स
न्तेन पाणिभ्यां विन्यसेत् करपृष्ठयोः ॐ न
मः सम्पुटाद्यं करन्यासे नियोजयेत् त
था मातृकावर्णैः षडङ्गं मातृकायास्तु
साधकः कारयेत्ततः स्वराणां क्लीबही
नानां सविन्दूनां क्रमेण तु इमयुग्मान्त
रालेन पञ्चवर्गसविन्दुकम् निक्षिप्याद्यादि
वर्गान्तशोधवर्गान्तरालके हृदयं वशी

पुण॰ र॰ १७ रोदेति शिखा च कवचं ततः नेत्रमस्त्रमथमेतु
नं नमः स्वाहाक्रमेण तु वषट् हुं वौषट् स्त्रव
फडन्तः योजयेत्स्त्रिये षडङ्गोऽयं मातृकायाः
17 सर्वपापहरस्मृताम् षडङ्गं मातृकायास्तु सा
धकः कारयेत्ततः स्वराणां क्लीवहीनानामपि
ति ऋॠलृॡहितानामिति संख्यैः एवं विधि
नां मातृकाषडङ्गं कृत्वा तां ध्यायेत् यथा ध्या
येत्तां भावरूपां सकललिपिमयीं लोचनां
भोजयुग्मां मुक्तालंकारभूषां शशिमुकुट
जटाटोपयुक्तां प्रसन्नाम् विद्यामुद्राक्षसू
त्रं कुम्भान्वरमपि दधतीं शुक्लपद्मोपरीया
वागेदेवीं पंचवक्त्रां कृतभरनमितां चिन्तयेत्
साधकेन्द्रः एवं ध्यात्वा ककारादिक्षकारा
न्तं न्यसेद्यथा ललाटमुखवृत्तादिश्रुतिघ्रा
णेषु गण्डयोः ओष्ठदन्तोत्तमाङ्गस्य दोष्पत्स
न्ध्यग्रकेषु च पार्श्वयोः पृष्ठतो नाभौ हृदये
जठरांसके ककुद्यंसे च तु सर्वहस्तपादयु
गे ततः जठरान्यसयोर्न्यसेन्मातृकान्तां य
थाक्रमात् ततः प्रयोगः अं नमो ललाटे आं
नमो मुखे इं ईं दक्षवामनेत्रयोः उं ऊं दक्षवाम

कर्णयोः ऋं ॠं दक्षवामघ्राणयोः लृं ॡं द
क्षवामगण्डयोः एं ऐं ऊर्ध्वाधरोष्ठयोः ओं औं
ऊर्ध्वाधरदन्तपङ्क्त्योः अं मस्तके अः मुखे कं खं
गं घं ङं दक्षबाहुमूलसन्ध्यग्रेषु चं छं जं झं ञं
वामबाहुमूलादिषु टं ठं डं ढं णं दक्षजङ्घादिषु
तं थं दं धं नं वामजङ्घादिषु पं फं दक्षवामपार्श्व
योः बं पृष्ठे भं नाभौ मं जठरे यं त्वगात्मने न
मः हृदि रं असृगात्मने नमः दक्षांसे लं मांसा
त्मने नमः ककुदि वं मेदात्मने नमः वामांसे
शं अस्थ्यात्मने नमः दक्षिणबाहौ षं मज्जात्म
ने नमः वामबाहौ सं शुक्रात्मने नमो हृदादि
दक्षपादे हं जीवात्मने नमः हृदादिवामपादे
ळं प्राणात्मने नमः पादादिहृदि क्षं परमात्म
ने नमः हृदादिशिरसि इति व्यापकं न्यसेत्
पञ्चाशद्वर्णन्यासः क्रमेणैवं प्रदर्शितः ॐ
आद्यन्तो नमोऽन्तो वा सबिन्दुर्बिन्दुवर्जितः मा
यालक्ष्मीबीजहृद्वीप्सलक्ष्मः श्रीकान्तेद्धृतेः अ
थमातृकान्यासमुद्रायथा ललाटेनामिका
मध्ये विन्यसेन्मुखवृत्तके तर्जनीमध्यमाना
मा वृद्धानामे वनेत्रयोः अङ्गुष्ठं कर्णयोर्न्यसेत्क

पृथा।
१।
१८
18

निष्ठांगुष्ठकौ नखैः मध्यानामिकयोर्गाढयोरङ्गुष्ठम
ध्यमामोष्ठयोर्न्यसेत् अनामांगुष्ठयोर्न्यस्य म
ध्यमामुन्नमांगके मुखेनासां मध्यमां च हस्तया
दृष्टपार्श्वयोः कनिष्ठानामिकामध्यामस्ता हस्त
पृष्ठे तु विन्यसेत् हृदये च तलं सर्वं अंसयोश्च क
कुक्ष्यलेम हस्तर्वं हस्तपादकटिमूलेषु तलमे
वच एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्ति-
ताः अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फ
लः अथ श्रीकण्ठादिन्यासो यथा विन्यसेन्मातृ
कास्थाने श्रीकण्ठाद्यान्यथाक्रमम् पूर्णोदर्या
दिभिः सार्धं मातृकाङ्गसमाहितान् श्रीकण्ठ
नन्तसूक्ष्माख्यत्रिमूर्तिरमरेश्वरः अर्घीशो भारभू-
तिस्तिथीशः स्थाणुको हरः झिण्टीशो भौ
तिकः सद्योजातश्चानुग्रहेश्वरः अक्रूरश्च महासे मू
नः षोडशास्वरशक्तयः पश्चात्क्रोधीशचण्डीशप
ञ्चान्तकशिवोत्तमाः तथैकरुद्रकूर्मैकनेत्राख्य
चतुराननः अजेशशर्वसोमेशास्तथा लांगलि
दारुकौ अर्धनारीश्वरः उमाकान्तश्चाषाढिदं
डिनौ अत्रिमीनमेषाख्यलोहितश्च शिखी
तथा छगलण्डद्विरण्डेशो समहाकालवालि

न्तो भुजंगेशपिनाकेशखड्गेशाख्येबकेश्वरः
श्वेतभृग्वीशलकुलिशिवाःसंवर्तकस्तथा प
तेरुद्राःस्मृतारक्ताःधृतशूलकपालकाः पू
र्णोदरीस्याद्विरजाशाल्मलीतदनन्तरम् लो
लाक्षीवर्तुलाक्षीचदीर्घघोणासमीरिता
सदीर्घमुखिगोमुख्यौदीर्घजिह्वातथैवच
कुण्डोदर्यूर्ध्वकेशीचतथाविकृतमुख्यपि
ज्वालामुखीततोज्ञेयापश्चादुल्कामुखीततः
श्रीमुखीचविद्यावहेताःस्तुःसर्वशक्तयः
महाकालीसरस्वत्यौसर्वसिद्धिस्तथैवच गौ
रीत्रैलोक्यविद्यास्यान्मन्त्रशक्तिस्ततःपरम् आ
त्मशक्तिर्भूतमातातथालंबोदरीमता द्रावि
णीनागरीभूयःखेचरीचैवमंजरी रूपिणी
वीरिणीपश्चात्काकोदर्यपिपूतना स्याद्भद्रका
लीयोगिन्यौशंखिनीगर्जिनीतथा स्यात्कालरा
त्रिकुब्जिन्यौकपर्दिन्यपिवज्रिणी जयाचसुमु
खीश्वरीरेवतीमाधवीततः वारुणीवायवी
प्रोक्तापश्चाद्रक्षोविदारिणी ततश्चसहजाल
क्ष्मीर्व्यापिनीमायायान्विता पन्नारुद्रांकपीठ
स्थाःसिन्दूरारुणविग्रहाः रक्तोत्पलकपाला

श्या. र. १९

ध्यामलं कृत्वा करांबुजाः अथ प्रयोगः अं श्री
कण्ठ भूर्णी दरी ध्यानं नमो गुरवे हृत्से एवं क्रमे
ण मातृकाख्या नेन समेत अथ षोढा न्यासः
तत्र कं वीरतंत्रे केवला मातृका कृत्वा मातृ
कां तारसंपुटाम् मातृकापुटितं तारं समस्त
त्सायकमलमः मायाबीजपुटितां तु मातृ
कां पुटितं च ततः कामेन पुटितां देवीशक्ति
न संपुटितं समेत क्रीं ठं ब्लूं च पुनर्जे स्वा स्र स्हि
ल्ल्ल्ल च पूर्ववत् मूलेन पुटितां देवीं न्यस्तं
मूलमेव च अनुलोमविलोमेन न्यासमंत्र
यथाविधि मूलेनाष्टोत्तरशत जापकं त्वेनवि
न्यसेत् ॐ अं ॐ एवं मातृकापुटितं श्री अं श्री
एवं मातृकापुटिते एवं कामपुटितां शक्ति
क्रीं ठं ब्लूं सं स्हल्ल्ल्ल पूर्ववन्मंत्रपुटितां म
अनुलोमविलोमतः केवलमंत्रमातृका.
स्थाने न्यसमष्टोत्तरशतेन जापकं कुर्यात्
केवलमातृका ॐ अं अं ॐ अं श्री अं श्रीं
अं श्रीं अं क्लीं अं क्लीं अं क्लीं अं ह्रीं अं ह्रीं
अं ह्रीं अं मंत्रं अं मंत्रं हं मंत्रं हं अमादर्शित
ह्रीं पुटितां शक्तिं ह्रीं ठं ब्लूं स्हस्हल्क्लीं पूर्व।

मंत्रपुटितां स्वस्वपुटितं मंत्रमिमादिलिखितमा
स्ति इति गुरुमतेन दुर्गायाश्चाघोर्द्ध्वप्रकीर्तिता ता
रायाः कालिकायाश्च सत्पुरव्योक्षततोपरा कृ
तेस्मिन्न्यासमवर्येन सर्वपापं प्रणश्यति विघ्नाप
मृत्युहरणे ग्रहरोगादिनाशनम् दुष्टसत्त्वाः
विनश्यन्ति शत्रवो यान्ति मित्रताम् कवित्वल
हरी तस्य ज्ञातार स्यपरम्परा अणिमाद्यष्टसि
द्धिस्तु तस्य हस्ते व्यवस्थिता कायिकं वाचि
कं वापि मानसं वापि दुष्कृतम् सर्वं तस्य विनाश
ं याति न्यासस्य विलनात् अपहृति तयंया
ति यत्किं विद्रुपपातकम् यद्रूपं दृश्यते सोपि
सतद्रूपं च गच्छति येन मान्ति महादेविषोडा
पुटितविग्रहाः अल्पायुः सभवेत्तस्यो देवता
कं पतेभिया अथ तत्त्वन्यासो यथा मूलादि
खण्डान्ते आत्मतत्त्वाय स्वाहा इति पादादिना
भिपर्यन्तं न्यसेत् द्वितीयखण्डान्ते विद्यातत्त्वा
य स्वाहा नाभ्यादिहृदयान्तम् तृतीयखण्डा
न्ते शिवतत्त्वाय स्वाहा हृदयादिशिरःपर्यन्त
तं इत्थं सर्वतंत्रे आत्मविद्याशिवैस्तत्त्वैस्तत्त्वमा
सेसमाचरेत् अथ बीजन्यासं कुर्याद्यथा

पूर्णा.

२. ब्रह्मरंध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके
२. गुह्ये वक्त्रे च सर्वांगे सप्तबीजा[illegible]मान्न्यसेत ॐ
तत्र प्रयोगः आद्यबीजं ब्रह्मरंध्रे द्वितीयं भ्रु
वि तृतीयं भाले चतुर्थं नाभौ पंचमं गुह्ये
षष्ठं वक्त्रे सप्तमं सर्वांगे न्यसेत् ततो मूलमं
त्रेण नवधा सप्तधा पंचधा वा व्यापकं न्यसेत्
तदुक्तं भैरवतंत्रे पंचधा नवधा वापि मूलेन स
प्तधा तथा स्वतंत्रेपि मूलेन नवधा व्यासं का
रयेद्व्यापकं ततः इति श्रीपूर्णानन्दपरमहंस
विरचिते श्यामारहस्ये न्यासाख्यविवरणं ना
म प्रथमः परिच्छेदः १ ॥ श्रीकालि
कायै नमः ॐ अथान्तर्यजनं वक्ष्ये दृष्टादृष्ट
फलप्रदम् गुरुध्यानं प्रकुर्वीत तथा पूर्वं वि
शुद्धयोः स्नायात्सुविमले तीर्थे पुष्करे हृदया
श्रिते विंदुतीर्थेथवा स्नायात्सुनजेन्मनवि
यते अथवा इडासुषुम्णोः शिवतीर्थकेस्मि
न्स्नानं वर्णेश्वरहः शारीरे ब्रह्मांबुभिः स्रो गं॰
तितयोः सदा यः किं तस्य गांगैरपि पौष्करैर्वा
इदं स्नानं शिवशक्त्योः समावेशो यस्मिन्का
ले प्रजायते सा सन्ध्या कुलनिष्ठानां समाधि

स्थैः प्रतीयते इति मन्त्रोपासनम् प्रथमं
लाधारात्क्रमेण लिङ्गनीलोमस्तर्याग्निरूपिणी
स्वा॰ मु[illegible]ष्मपरविन्दुनिर्भिद्य देहदेवतां तर्पयेत्
वह्निकीलनलसंवहागालितं घस्मरामृतम्
तेनामृतेन तद्दिमेन तर्पयेत्सर्वदेवताम् ब्रह्म
रन्ध्राद्योभागोयद्भ्रान्तपदमुत्तमम् कला
सारेण संहर्षेण तर्पयेत्तेनविचरीम् इमस्थे
र्दनम् आधारे लिङ्गनाभौ हृदयसरसिजे
तालुमूले ललाटे द्विपत्रे षोडशारे द्विदशद
शदले द्वादशारे चतुष्के वासान्ते बालम।
ध्ये डफकठसहिते कण्ठदेशे स्वराणां हंक्षतो।
कोदण्डमध्ये मम सन्तु विलं[illegible]थी मर्मसंपत्तिप्र
सिद्ध्यै इति मातृकावर्णान्कण्ठस्थक्रमेण
ध्यायेत् इमन्तर्मातृकान्यासः अथ षडङ्ग।
मासंकुर्यात् तदुक्तं गौतमीये ईशमानहृ
दयो यत्हृदयः स्याच्छिवात्मकः क्रियते तस्य
रक्षेनहन्मंत्रेण ततः परम् सर्वज्ञादिगुणोपेते
तेसंविद्रूपपरात्मनि क्रियते शुचियाहारः
शिरोमंत्रेण देशिकः हृच्छिरो रूपविद्याया
मनसा भावनाहृत्वा क्रियते निजदेहस्य शि

श्या॰
र॰
२१

21

त्वांमंत्रेणदैशिकः मंत्रात्मकस्यदेहस्यमं।
त्रध्यानेनतेजसा सर्वतोवर्मंमंत्रेणक्रियते
मासमंसंवृतिः यद्ददातिपरंज्ञानंसंविद्रूपंपरा
त्मनि हृदयादिसमंतेजः स्पादेतन्मंत्रसंग
तं अध्यात्मिकात्तिरूपंयत्साधकस्यविना
शयेत अविद्यायाश्चतंत्रयस्यंरयामसमी
रितं इतिषडंगंविधायध्यानंकुर्यात् शा
क्तिहृदयपुटान्तःस्थमलहृदयसंस्थितम
ज्योतिस्तत्वमयंध्यायेत्कुलाकुलनियोजना
त् अथवा शृंगाटहृदयमध्यस्थशाक्तिहृदयपु
टीकृतम् सदा स्वपरमंध्यायेध्यानंतत्कु
लयोगिनाम् अथवा निरालंभपदेस्फूत्स
यत्तेजउपजायते तद्धर्ममभ्यसेत्त्रिसं॰
ध्यानमेतद्धियोगिनां तद्धर्ममित्यन्तःकरण
मित्यर्थः इतिध्यानम् अर्चयन्विषयैःपुष्पै
स्तत्त्वाग्निमयोभवेत् मायासक्तन्मयतापु
ष्टिः सोऽहंभावेनचिन्तयेत विषयपुष्पाणि
यथा अमायमनहंकारमरागममदंतथा
अमोहकामदंभंच अद्वेषक्षोभकौतनः अ
मात्सर्यमलोभंचदशपुष्पंविदुर्बुधाः अ

हिंसापरमंपुष्पंपुष्पमिन्द्रियनिग्रहः दया
पुष्पंज्ञानपुष्पंक्षमापुष्पंचपंचमं ॥ १ ॥ पुष्प
समभिः पुष्पैरर्चयेत्परदेवतां ॥ इतिपूजनं ॥
मालापंचाशिकाप्रोतसूत्रंपंक्तिशिवात्म
कं ग्रथिता कुण्डलीशक्तिश्च लान्ते मेरुसं
स्थितिः एवंविधिना वर्णमालाजपस्फुर
न्तंमेरुंकृत्वा अकारादिलकारान्तंहका
रादिक्षकारपर्यन्तंमूलमन्त्रप्यपरते
नमिजपंसमर्पयेत अन्यादर्शितं अका
रादिहकारान्तंलकारादिक्षकारपर्यन्तं
मूलमन्त्रमित्यादिलिखितमस्ति । अथ ।
होमः आमूलपरिस्फुरन्तविमर्शाऽऽत्मा
नात्मज्ञानात्मपरमात्मस्वरूपंवतरं
अकुण्ठमानन्दमेवखलाग्रहंनाभौविभा
व्यतन्मयेज्ञानाग्नौजुहुयाद्यथा मूला
ग्नौनाभिचैतन्यरूपविमर्शमनसास्रुचा सुषु
म्णावर्त्मनानित्यमक्षवृत्तीर्जुहोम्यहंस्वा
हा ततोमूलान्ते अनेनप्रथमाकृतिंदया
न धर्माधर्महविर्दीप्ते आत्माग्नौमनसास्रु
वा सुषुम्णावर्त्मनानित्यमक्षवृत्तीर्जुहोम्य

प्रपा॰
२॰
२२

22

हूं स्वाहा अनेन द्वितीयाहुतिं दद्यात् ततो मू
लान्ते प्रकाशाकाशहस्ताभ्यामवलंब्यो॰
न्मनीस्रुवं धर्माधर्मकलास्नेहपूर्णं वह्नौ
जुहोम्यहं स्वाहा अनेन तृतीयाहुतिं दद्या
त् ततो मूलान्ते तस्मिन्निरन्तरनिरिन्ध[illegible]न
मेधमाने मायापृथ्व्याकारपरिपश्चितिसंवि॰
दग्नौ कस्यांचिद्धुतमरीचिविकासमूर्मौ वि
श्वत्रुहोमिवसंध्यादिशिवावसानम् इत्यन्त
र्यजनं कृत्वा साक्षात्कुलमयो भवेत् ततस्य
पापशत्यादिजीवन्मुक्तो भवेद्ध्रुवम् इति श्री
पूर्णानन्दपरमहंसविरचिते श्यामारहस्ये
न्तर्यजनं नाम द्वितीयः परिच्छेदः २ ॥
श्रीकालिकायै नमः अथ साधको युवती
वेशं कृत्वा युवतीमेव वा कारयित्वा पीठन्या
सं कुर्यात् तदङ्गं कुमारीकल्पे ततः स्त्रीवेश
धारी स्यात् सिन्दूराङ्कितमस्तकः शृङ्गारोज्ज्व
लवेशाढ्यस्ताम्बूलपूरिताननः एवं वेशा॰
दिकं सर्वव— नितामपि कारयेत् पीठन्या
सं ततः पश्चादाधारशक्तिपूर्वकं प्रकृतिक
मठं चैव शीघं ष्ट्वीतद्येवच सुधांबुधिं म॰

णिद्वीपं विचिन्त्य मणिगृहं तथा श्मशानं पा
रिजातं च तन्मूले रत्नवेदिकां तस्योपरि
मणेः पीठं न्यसेत् साधकपुङ्गवः चतुर्दिक्षु
कुणीन्द्रवान् शवांश्च नरमुण्डकान् अथ धर्मा
श्चैव धर्मांश्च पादगांश्च चतुष्टये हृदिशोऽ
तथा पद्मं सूर्यसोमं महेश्वरि वैश्वानरं त
था सत्वं रजश्चैव तमस्तथा आत्मानं चैव
विन्यस्य शक्तिं हृत्पद्मके न्यसेत् इच्छा ज्ञा
ना क्रिया चैव कामदा कामदायिनी रती रति
प्रिया नन्दा कर्णिकायां मनोन्मनी वाग्भवं
प्रथमं प्रोक्तं परायै तदनन्तरं अपरायै विहृ
पायै ह्सौः पदं ततः परं सदाशिवमहाप्रेतप
द्मासनं तथा नमश्चान्ते मन्त्रोऽयं पीठमा
समुद्धाहृतः एवं देहमये पीठे चिन्तयेदिष्टदे
वताम् अथादौ कामकलारूपमात्मानं विभा
व्य मूलाधारात्कुण्डलिनीं परमशिवानन्दध्या
ना चन्द्रामृतेन संप्लाव्य करकच्छपिकया
पुष्पं गृहीत्वा सुषुम्णावर्त्मना हृदयाष्टदलपद्मे
देवीं ध्यायेत् तत्र कुं संस्थाने ततः कामकला
ध्यानादावाह्य कालिकां परामकुर्मीं त्रिमुद्र

पाशाङ्कुशं पत्रमध्ये निर्दिष्टं ध्यायेत् अथ कामक
कलायथा तद्रूपं भावयेत्तामसेऽपि पुष्पवि
ष्टवदाकारं तदधः कवचयुग्मकं सर्वविद्या
मूलाधारिणी सर्ववाग्विभवप्रदं सर्वार्थसाध
कं देवि सर्वरञ्जनकारकं तदधः स्वपत्रार्थं
च चिन्तयेत्तस्योपरि सर्वभूतादिमूर्तं तत्सर्व
देवनमस्कृतं सर्वाह्लादनसंपूर्णं सर्वरञ्ज
नकारकं सर्वार्थसाधकं देवं सर्ववर्णात्म
कं एतत्कामकलाध्यानं गोप्यं साधकस
त्तमैः श्रीक्रमे या सा मधुमती नाम्नी या सा
मोहनकारिणी बाह्याभ्यन्तरभेदेन चिन्त
नीया च तां स्मरेत् त्रैलोक्यमेकरूपेणात्मा
नमेकरूपिणीं स्वप्रकाशप्रकृतिरूपेण देवीं तां
वर्णरूपिणीं चिन्तयेत्तदन्तरे देवी सर्वव्याप
मू ककारिणीं ईकारमूतमन्त्रस्य अवयव वक्तृ
मू त्वं विल्वपत्रस्य देवेशि प्रत्यंगमवक्रकं मध्ये
न विन्दुरूपं स्तनद्वन्द्वं हृदि स्थाने नियोजये
त अकारार्धकलां त्रयं स्यायोनिमध्ये विचिन्त
येत् तथा कामकलारूपं मदनाङ्कुरगोचरम्
त्यं दादिमसंकाशं सिन्दूराभं स्तनद्वय वि
मू

विंदुसंकल्पमात्रेण तत्स्फारदीपशिखां प्रिये
आधारब्रह्मरन्ध्रान्तं तन्मार्गेण भावयेत्
कामो विन्दुरहं देवि तत्र स्थाप्य परमेश्वरि शि
वशक्तिमयं देवि तदधः स्थानकं च द्वयं तद-
धः सपरार्धं तु चिद्रूपा परमाकला सापि कु
ण्डलिनी शक्तिः कामकलास्वरूपिणी सा
यथा वर्त्म गच्छन्ती भित्त्वा ग्रन्थिं च तद्देशं प्र
विश्य परमार्गेण सूक्ष्माकारस्वरूपिणी सा
च त्रिविधा सृष्टा ब्रह्मविष्णुस्वरूपिणी सञ्चि
न्त्य साधकश्रेष्ठस्त्रैलोक्यं वशमानयेत् एत
त्ते कथितं देवि कामकलासनिश्चितं गोप्तव्यं
च प्रयत्नेन यदीच्छेदात्मनो हितं अथ क्रमं मु
द्रा यथा तदुक्तं कालिकापुराणे वामहस्त
स्य तर्जन्यां दक्षिणस्य कनिष्ठया तथा दक्षि
ण तर्जन्यां वामांगुष्ठेन योजयेत् तदुक्तं दक्षि
णांगुष्ठं वामस्य मध्यमादिकाः अंगुलीर्याभ
वेत्पृष्ठे दक्षिणस्य करस्य च वामस्यापि तर्ज
ष्ठेन मध्यमानामिकां तथा अधोमुखे च ते
कुर्याद्दक्षिणस्य करस्य च एवंविधः सर्वसि
द्धिं ददाति पाणिकच्छपः कुर्यात्तु हृदयासने

पृग·
२·
२४
24

निमील्य नयनद्वयं । समं कायशिरोग्रीवं कृत्वा
स्थिरतमो भूयः ध्यानं संभावयेन्मन्त्री सर्वपा
पप्रणाशनं । तदुक्तं स्वतन्त्रे ॐ देव्या ध्यानं प्रव-
क्ष्यामि सर्वदेवोपसेवितं । अञ्जनाद्रिनिभां दे-
वीं करालवदनां शिवां । मुण्डमालावलीकी-
र्णां मुक्तकेशीं स्मिताननां । महाकालहृदम्भो-
जस्थितां पीनपयोधरां । विपरीतरतासक्तां घो-
रदंष्ट्रां करालिनीं । नागयज्ञोपवीताङ्गीं चन्द्रा-
र्धकृतशेखरां । सर्वालंकारसंयुक्तां मुक्ताम-
णिविभूषितां । मृतहस्तसहस्रैस्तु कृतका-
गं॰ ञ्चीं दिगंशुकां । शिवाकोटिसहस्रैस्तु योगिनी-
भिर्विराजितां । रक्तपूर्णमुखाम्भोजां मद्यपानप्र-
मत्तिकां । वह्न्यर्कशशिनेत्रां च रक्तविस्फुरि-
ताननां । विगतासुकिशोराभ्यां कृतकर्णाव-
तंसिनीं । कण्ठावसक्तमुण्डालीगलद्रुधिरच-
र्चितां । श्मशानालयमध्यस्थां ब्रह्मकेशववं-
दितां । सद्यःकृत्तशिरःखड्गवराभीतिकरां-
बुजां । अत्र वामोर्ध्वहस्ते च कृपाणं तदधः शिरः
अभयं दक्षहस्तोर्ध्वे तदधो वरमित्यपि गोडुक्यम
तदुक्तं महाकालकृततन्त्रे ऊर्ध्ववामकपाले

करकमलतले छिन्नमुण्डं ततो थः सव्ये भीतिं
वरं च त्रिजगद्भयहरां दक्षिणकालिकेति जसैत
न्नाम वर्णितं च मन्त्रविभवं भावयन्नेनद्वन्ते।
घामस्तोकरस्याः प्रकटितवदनेस्मितुर्यस्य
वक्रस्य अथ विरूपाक्षकृतध्यानक्रमेण ध्या
येत् यथा भिन्नाञ्जनचयप्रख्यां प्रमीतशव
संस्थितां गलच्छोणितधाराभिः स्मेरानन
सरोरुहां पीनोन्नतकुचद्वन्द्वां पीनोन्नतनि
तम्बिनीं दक्षिणामुक्तकेशां गीर्दिगम्बरां विलो
दिनीं महाकालशिवाविष्टां स्मेराननां परि
स्थितां मुखमाल्यासितां मोदमोदिनीं मदवि
ह्वलां आरक्तमुखेन शोभितां भिविराजि
तां शवहृदयकृतोत्तंसां सिंहासनतिलकोज्ज्वलां मू
पंचाशन्मुण्डघटितमालिनां टंकशोभितां मू
नानामणिविशेषोपचितां नानालंकारभूषितां मू
शिवास्थिकृतकेयूरां शवदक्षिणमण्डितां मू
शवद्वन्द्वस्थलां नृत्यं कुर्वतीं लेलिहानां शवं कश्चित्
शवमांसकृतग्रासां सास्हहासां मुकुन्दु कुः
वक्त्रां मुण्डधरां वामे सव्येऽभयवरप्रदां दन्तु
रां च महारौद्रीं चण्डनादान्तिमीषणाम्। शि।

प्रपा. २. २५

25

वाभिर्घोररूपाभिर्वेष्टितां भयनाशिनीं॥ भीमे
भीमैः स्वभक्तेभ्यः जल्पन्तीं घोरनिःस्वनैः। ऊर्ध्वं
किं भूयः किं भूय इति नितिप्रभाषिणीं॥ अथा
परध्यानमाह भैरवतन्त्रे कालवदनां घो
रां मुक्तकेशीं चतुर्भुजां॥ दक्षिणां कालिकां
दिव्यां मुण्डमालाविभूषितां॥ सद्यःकृत्तशि
रःखड्गवामोर्ध्वकराम्बुजां॥ अभयं वरदं
चैव दक्षिणोर्ध्वाधःपाणिकां॥ महामेघप्रभां
श्यामां तथैव च दिगम्बरीं॥ कण्ठावसक्तमुण्डा
लीगलद्रुधिरचर्चितां॥ कर्णावतंसितानी
तशवयुग्मभयानकां॥ घोरदंष्ट्राकरालां च
पीनोन्नतपयोधरां॥ शवानां करसंघातैः कृ
तकाञ्चीं हसन्मुखीं॥ सृक्किद्वन्द्वगलद्रक्तधा
राविस्फुरिताननां॥ घोररूपां महारौद्रीं श्म
शानालयवासिनीं॥ दन्तुरां दक्षिणां देवीं मु
क्तलंबकचोच्चयां॥ शवरूपमहादेवहृदयो
परिसंस्थितां॥ शिवाभिर्घोररूपाभिश्चतुर्दि
क्षु समन्वितां॥ शवप्रसन्नवदनां स्मेराननस
रोरुहां॥ एतेषामन्यतमेन देवीं ध्यात्वा मा
नसोपचारैः संपूजयेत्॥ तदुक्तं कुमारीकल्पे

पनांते स्नानैः सुभोगैर्गन्धपुष्पैः सदीपकैः
सरयावलिपुष्पैश्च पूजयित्वैवं यथाविधि ता
तोऽवैमानसजपं कुर्यात् होमादिमेवच नमस्कृ
त्य तथा स्तुत्वा वह्नियागं समाचरेत् सजपि
त्वा वहिः पूजां यन्त्रपात्राणि यथा सुप्रसमा
लानि ते ताम्रपात्रे कपाले वा श्मशानकाष्ठ
निर्मिते शनिभौमदिने वापि पारीरे सन्तं सम
वे सर्णिरोपथ लोहे वाप्रसन्ने वक्रमालिखे
त् अथ्यादिह्व वगीलिम सुवर्णादिपात्रे सव
र्णे रजतताम्रशलाकया विल्वकण्टकेन पु
ष्पेन वा मूलमन्त्रेण ध्यायीदेवीं हुं ह्रीं वि
लिख्य ततस्त्रिकोणं विमस्य त्रिकोणेन हि
मिसेन ततोऽवविलिखेन्मन्त्री त्रिकोणत्रय
सुसमं ततो वृत्तं समालिख्य लिखेदष्टदल
ततः वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेक
कमिति कुमारीकल्पेऽपि प्रादौ त्रिकोणं वि
मस्य त्रिकोणं तद्वहिर्मिसेन वहिस्त्रिकोण
मालिख्य षट्कोणं च वहिर्लिखेत् मध्ये तु
वैन्दवं चक्रं वीजं मायाविभूषितं षट्कोण
वहिर्वृत्तं ततोऽष्टदलकं लिखेत् वहिर्वृत्तेन

श्या. २. २९

मन्त्रचक्रं भूर्जपत्रे केन मन्त्रेण तन्मे त्वं वद किं मात्रा
तिं यत्र मे तेन संशयः पत्रे तु विलिखेन्मन्त्र
कुण्डगोलविलेपिते स्वयंभूकुसुमैर्मिश्रे
ङ्कुमागरुसंविते स्वतन्त्रेऽपि स्वयं विद्यास
देहस्तु चक्रराजं लिखेत्सुधीः स्वर्णलेखन्या वा रा
जतेन ताम्रपाषाणेन वा ऽथवा तद्वत् स्वयंभू
कुसुमं कुण्डगोलोत्थं रोचनागुरुः का
श्मीरमृगनाभीव मद्यं च मलयोद्भवं पय
गन्धः समाख्यातः सर्वदा चण्डिकाप्रियः प
तेन गन्धयोगेन योनिचक्रं समालिखेत् यो
निद्वयं ततः कुर्यात्कोणषट्कं ततः प्रिये
तत्राष्टदलं भूमिवत्तद्वीरैः समन्वितं प
तत्रैकस्थितं चक्रं मन्त्रपुष्पाञ्जलिं क्षिपेत्
अत्र केचिद्वदन्ति षट्कोणाभ्यन्तरमेव तु
त्रिकोणं तत्र सर्वमुक्तं स्वतन्त्रं तद्वदादिवि
दध्यात् वीरतन्त्रके कारिणेन तत्कुलसङ्कु
वासि विरोधात्तु तत्पादाष्टजातिषष्ठ का
लीकपालिनीकुलाकुलकुलानि विरोधिनी
विघ्नचितां तत्संस्पर्शवह्निः षट्कोणकेषु यः
उग्राय प्रभादीसां तत्रैव तास्त्रिकोणके

माङ्गं पुङ्गमिति नावेव तथैवान्तस्त्रिकोणके
नीलं च नांवलाकाच तथापरा त्रिकोणके
इति तस्मात्षट्कोणान्तर्गतमेव त्रिकोण-
युक्तं षट्कोणं शक्तेनात्र शक्त्यात्मकं को-
णषट्कोणमिति श्रीब्रह्मानन्दपरमहंस
गुरूणां परामर्शः तथा च नीलातन्त्रे पंच
शक्तिसमालिख्य अथो वक्ष्ये स्वलदलाग्र
सिद्धेश्वरीमते अथो वक्ष्ये पंचकोणमतो
न्यस्य मलयकं एवंभूतमहाचक्रं स्थापये
त्रिंशद्विस्तरे फेत्कारिणं वहिरष्टदलं कु
र्यात्सुतत्वोगोपशोभितं इति कालिकाश्रु
तौ त्रिकोणं त्रिकोणं नवकोणं पद्ममिति
कालिकाकुलसद्भावेपि त्रिकोणं विन्य
सेदादौ पुरस्तादपि त्रिकोणकं नवकोणं पु
नस्तत्र तन्मध्ये स्थापयेच्छिवम् तत्र भव
न्मतेपि शक्त्यात्मकमेव त्रिकोणं तत्तु शि
वशक्त्यात्मकम् वीरतन्त्रकालीतन्त्रसंतन्त्रा
दिविरोधात् तस्मादत्र षट्कोणं शक्तेन श
क्त्यात्मकमेवोच्यते इति भावः तत्र नवको
णान्तर्गतयुक्तस्त्रिकोणद्वयमपरः प्रकारः

पृ॰ १॰ कथं स्यादिति चेत् तत्रैव षट्कोणवरकं
सृजयित्वा तथापरत्रिकोणं तथैवापरत्रि
२२ कोणं क्रमेण नवकं सृजयेत् कुलसद्भावे
22 कालीकपालिनी कुल्ला कुरुकुल्ला विरोधि
मू॰ नी विप्रचित्ता महोग्रैव बहिः षट्कोणके उग्रः
उग्रा उग्रप्रभा दीप्ता परत्रिकोणके न्यसेत् नी
ला घना बलाका च तथैवा चापरत्रिके मा
त्रा मुद्रा मिता चैव तथापरत्रिकोणके इमा
दि तस्माद्देवत्रिकोणान्तर्गतत्रिकोणद्वय
मिति षट्कोणाभावात् अथ त्रिकोणान्त
र्गतं नवकोणं कथं न स्यादिति चेत् तन्निर्वि
ष्टमेव यतो नवकोणशब्देन शक्त्यात्मकं नव
कोणमुच्यते न तु शिवशक्त्यात्मकं वचना
न्तरदर्शनात् तद्यथा कालीक्रमे त्रिकोणं वि
लिवेदादौ न तस्यापि त्रिकोणकं नवशक्ति
युतं देवि विद्धि चक्रं समालिखेत् अथ तत्र भे
दान्नानाविधमेव यंत्रं कथं न स्यादिति चेत्
सर्वसंविधेयकल्पने नानाविधकल्पनमे
व गौरवं स्यादिति तस्मादेकमेव पंचदशा
कोणं प्रशस्तमिति एवं गौडमिश्रप्रभृतीना

मणिमण्डपमिति अथ स्वर्णादिसिंहासने
ग्रतोपवेश्य स्थाप्य पुष्पाञ्जलिनाच्छाद्य
तत्रपीठन्यासक्रमेणार्चयेद्यथा ॐ आ
धारशक्तये नमः ॐ प्रकृत्यै नमः ॐ कू
र्माय नमः ॐ अनन्ताय नमः ॐ पृथि
व्यै नमः ॐ सुधासमुद्राय नमः ॐ मणि
द्वीपाय नमः ॐ चिन्तामणिगृहाय नमः
ॐ श्मशानाय नमः ॐ पारिजाताय नमः
तन्मूले ॐ रत्नवेदिकायै नमः तस्योपरि
मणिपीठाय नमः दिक्षु नानामुनिगणेभ्यो
नमः नानादेवेभ्यो नमः बहुमांसास्थिमो
दमानशिवाभ्यो नमः चतुर्दिक्षु शवमु
ण्डचिताङ्गारास्थिभ्यो नमः धर्माय नमः
ज्ञानाय नमः वैराग्याय नमः ऐश्वर्याय
नमः अधर्माय नमः अज्ञानाय नमः अ
वैराग्याय नमः अनैश्वर्याय नमः शेषा
य नमः पद्माय नमः सूर्यमण्डलाय नमः
सोममण्डलाय नमः वैश्वानरमण्डलाय
नमः सं सत्त्वाय नमः रं रजसे नमः तं तम
से नमः आं आत्मने नमः अं अन्तरात्मने।

पूपा.
१.
२८
28

नमः ह्रीं ज्ञानात्मनेनमः पंपरमात्मनेन
मः श्रंसूर्यवेश्व इच्छायैनमः क्रियायैनमः
ज्ञानायैनमः कामदायैनमः कामदायि
न्यैनमः रम्यैनमः रतिप्रियायैनमः आन
न्दायैनमः कर्णिकायै मनोन्मन्यैनमः
पंपरायैनमः अपरायैनमः विरूपायैन
मः ह्रौं सदाशिवमहाप्रेतपद्मासनाय
नमः तथैवविधिनापीठपूजांकृत्वा क
लशस्थापनंकुर्यात् तल्लक्षणमाह तंत्रा
न्तरे कलांकलां गृहीत्वावैदेवानांविश्व
कर्मणा निर्मितोयंसुरैर्यस्मात्कलशस्ते
नोच्यते पादपद्मार्चायैस्तु कलास्त्रवतः
तिकलशः कलशमानमाह तदुक्तंतत्रैव
पंचाशदंगुलव्यासमुच्छ्रायोद्वादशांगुलः
कलशानांप्रमाणंतुमुखमष्टांगुलंमतम्
सौवर्णंराजतंवापिमार्तिकं वायथोदितम्
क्षालयेदस्त्रमंत्रेणकुंभंसम्यक्तदेरपवि अ
र्घप्रयोगः स्ववामेषट्कोणान्तर्गतत्रिको
णान्तर्गतत्रिकोणबिंदुवासवृत्तचतुरस्रंकृ
त्वा सामान्यार्घोदकेनाभ्युक्ष्यतत्राधारस्था.

क्लिं स्रोनम इति सम्पूजयेत् ततो नमः स्वाधा
रं प्रक्षाल्य मण्डलोपरि संस्थाप्य सं वह्नि
मण्डलाय दशकलात्मने नमः इति संपू
ज्य फडिति कलशं प्रक्षाल्य कारणेन सं
पूर्य रक्तवस्त्रमाल्यादिना भूषयित्वा देवी
बुद्ध्या संस्थाप्य अं अर्कमण्डलाय द्वादश
कलात्मने नमः इति संपूज्य द्रव्ये ॐ चं
मण्डलाय षोडशकलात्मने नमः इति पू
जयेत् ततः फडिति संरक्ष्य हूं इत्यवगुण्ठ्य
मूलमन्त्रेण संवीक्ष्य नमःसम्पुटेन कृत्वा
मूलेनमन्त्र [illegible] पुष्पेदत्वा शापमोचनं
कुर्यात् ततः कलशान्ते ततः सकारणं दिक्षु।
समानीय घटस्थितं विष्टितं रक्तवस्त्रेण र
क्तमाल्येन भूषितं वामभागे महेशानि म
ण्डलं चतुरस्रकम् तत्र संस्थापयेद्भक्त्या
देवीबुद्ध्या वरानने मण्डले कलशे द्वैव
न्त्वर्कशशिमण्डले स्ववामभागे षट्को
णं तन्मध्ये वृत्तत्र्यस्रकं लिखित्वा तत्र कुंभ
वैसो वर्णराजं तं तथा ताम्रं भूमिमयं वापि
यद्वा लोहविवर्जितं तत्रान्तरे च आधारे।

श्या॰
२॰
२९
29

स्थापयेन्मन्त्री सौवर्णे वाथ राजते । कांस्य-
मये मृण्मये वापि घटे मृण्मयशालिनि । सौ-
वर्णे भोगदं प्रोक्तं राजते मोक्षदं स्मृतं । कां-
स्ये शान्तिकरं चैव मृण्मये पुष्टिदं भवेत् । अ-
थ शापविमोचनं यथा । तदुक्तं कुमारीतन्त्रे
अथ वक्ष्ये शृणु देवेशि यथा पापादिकं मलि-
न दोषो जायते देवि तान्येव मन्त्रं शृणु प्रिये
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं । क-
चोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहं । सूर्य-
मण्डलसंभूते वरुणालयसंभवे । अमावी-
जमये देवि शुक्रशापाद्विमुच्यतां । वेदानां
प्रणवो बीजं ब्रह्मानन्दमयं यदि । तेन स-
त्येन देवेशि ब्रह्महत्या व्यपोहतु । एवं मन्त्र-
त्रयेणैव अभिमन्त्र्य सुराम्भसि । प्रदद्यात्का- भा॰
लिकायै च ततो नैव यु[illegible]ग्भवेत् । इति वा-
रत्रयं देवि चतं कृत्वा पठेत्त्रिधा । ततः ॐ वां वीं
वूं वैं वौं वः ब्रह्मशापविमोचितायै सुरादे-
व्यै नमः । इति वारत्रयं पठेत् । इति ब्रह्मशा-
पमोचनं । ततः ॐ श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः
सुरां कुरु शापं विमोचय अमृतं स्रावय

स्वावधय स्वाहा इति शुक्रशापमोचनं ॥ अथो
त्तरं ततो हंसः शुचिषद्वसुरन्तरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृत
सद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋ।
तं ॥ इति वारत्रयं सुरोपरि पठेत् ततो ध्या।
मध्ये आनन्दभैरवमानन्दभैरवीं च ध्याये
द्यथा । सूर्यकोटिप्रतीकाशं चन्द्रकोटिसु
शीतलं ॥ अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलो
चनं ॥ अमृतार्णवमध्यस्थं सदा प्रेतोपरिस्थि
तं ॥ वृषारूढं नीलकण्ठं सर्वाभरणभूषितं
कपालखट्वाङ्गधरं घण्टाडमरुवादिनं ॥ पा।
शाङ्कुशधरं देवं गदामुसलधारिणं ॥ खड्ग
खेटकपट्टीस [illegible] विचित्रवे
टकं मुण्डवरदाभयपाणिकं ॥ लोहितं देवदे
वेशं भावयेत्साधकोत्तमः । एवं ध्यात्वा हंस
रक्तमलवसं आनन्दभैरवाय वौषट् इमा
नन्दभैरवं ध्यायेत् यथा भावयेत्सुरां दे
वीं चन्द्रकोटियुतप्रभां ॥ हिमकुन्देन्दुधव
लां पञ्चवक्त्रां त्रिलोचनां ॥ अष्टादशभुजैर्युक्तां
सर्वानन्दकरोद्यतां ॥ प्रहसन्तीं विशालाक्षीं

श्या० देवदेवस्य संमुखीम् एवं ध्यात्वा सहस्रकमल
२. वरं श्मशानं देवीवामेषट् श्मशानं दक्षे भैरवीं सम्मुख
३. द्रव्यमध्ये शक्तिचक्रं विलिखेत् ततः त्रिपं
80 क्त्या दक्षिणावर्तेन अं १६ कं १६ थं १६ क्र
मेण विलिख्य तन्मध्ये हूंतं लिखेत् ततः
शिवशक्त्योः समावेशात् द्रव्यमध्येऽमृतं वि
चिंतयेत् मुद्रया चक्रं धृत्वा पठेत् इति द्रव्य
शुद्धिः तदुक्तं सर्वतंत्रे ततस्तावद्धृदये द्रव्यमा
ध्ये रक्तत्रिकोणं विधाय अकथादित्रिपंक्त्या च हल
क्ष मध्यं समन्वितम् पूर्वोक्तयोनिमुद्रया शिव
शक्त्योः समागमम् अमृतं चिंतयेद्द्रव्यमध्
यार्घ्यमृतं जपेत् अष्टधा मूलमंत्रं च जपेद्धु
त्वा थंठ ततः एतत्कारणं देवि सुरसं ज्ञानि
षेवितम् अनपैव तस्य नामस्मरेति भुवनत्र
ये अस्य गंधः केशवस्तेन गंधेन कौलिकः
पूजयेत् परमां देवीं कालिकां दक्षिणां शिवां १
ततः शंखविवीरपात्रस्थापयेत् मध्यभागतः
श्रीविद्योक्तविधानेन ततः पूजां समाचरेत्
उक्तं च मुंडमालातंत्रे रक्तचंदनविल्वादिद्रवा
पाद्यसमंवयुतैः अर्घ्यं दत्वा महेशानि सर्व।

कार्यार्थसिद्धये स्त्रीयाचार्घ्यदानेन योगि
नीनां भवेत्प्रियः महायोगी भवेद्देवि पीठ
प्रक्षालनेन जलैः स्वयम्भूकुसुमं दत्तेन भवेत्ष
ट्कर्मभाजनम् सुशीतलजलैर्वापि क
स्तूरीकुंकुमान्वितैः कुं उं गोलोख्यबीजैः
वा सर्वसिद्धीश्वरो भवेत् सामान्यार्घ्यं ततः
कृत्वा पयसा साधको नमः तण्डुलैर्मण्डलं कृ
त्वा पात्राणि स्थापयेद्बुध कुमारकल्पे ततो
ऽर्घ्यं कारयेन्मन्त्री तया नार्या स्ववशगा श्रद्धे
द्व्यमर्घ्यपात्रे निक्षिप्य प्रयतः सुधीः कुं उं।
गोलो द्रवं द्रव्यं स्वयम्भूकुसुमं तथा नायमी
विधेतत्र महामन्त्रस्य साधने नार्या तस्या
गलं ह्रद्वा मनेनेत्यर्घ्यः अथ श्रीविद्योक्तक
मेणार्घ्यपात्रस्थापनं यथा आदौ श्रीचक्र। स्वात्म
योर्मध्ये हृंकारेण त्रिकोणषट्कोणवृत्त
चतुरस्रं विलिख्य चतुरस्रे पूर्णगिरिपीठा
य नमः उड्डियानपीठाय नमः कामरूपपी
ठाय नमः जालंधरपीठाय नमः इति संपू
ज्य षट्कोणे षडङ्गं पूजयेत् ततो मूलखण्ड
त्रयेण त्रिकोणाग्रदेशे तत्संपूज्य मध्ये स्रा

पूजा.
१०.
३१
81

यारशक्तीः पूजयेत् त्रिकोणगर्भषट्कोण
मध्यवर्तिनां त्रिकोणं संस्थाप्य नमः इति सामान्या
र्घ्यजलेनाभ्युक्ष्य वह्नेर्दशकलाः पूजयेद्य
था यं धूम्रार्चिषे नमः रं ऊष्मायै नमः लं
ज्वलिन्यै नमः वं ज्वालिन्यै नमः शं विस्फु
लिङ्गिन्यै नमः षं सुश्रियै नमः सं सुरूपा
यै नमः हं कपिलायै नमः ळं हव्यवाहायै
नमः क्षं कव्यवाहायै नमः इति सर्वत्र नमों
तेन संपूज्य वह्निमण्डलाय दशकलात्मने न
मः इति पूजयेत् ततः षट्कोणे षडङ्गं सं
पूज्य मध्ये ब्रह्मकमण्डलुं देवीं संपूज्य कपाला
दिपात्रं कर्तृकेति प्रत्यालय त्रिपादिकोपरि सं
स्थाप्य तत्र सूर्यमण्डलं पूजयेद्यथा कं भं त
पिन्यै नमः खं बं तापिन्यै नमः गं फं धूम्रायै
नमः घं पं मरीच्यै नमः ङं नं ज्वालिन्यै नमः
चं धं रुच्यै नमः छं दं सुषुम्णायै नमः जं थं भो
गदायै नमः झं तं विश्वायै नमः ञं णं बोधिये
नमः टं ढं धारिण्यै नमः ठं डं क्षमायै नमः
इति नमोन्तेन पूजयेत् अं अर्कमण्डलाय
दशकलात्मने नमः इति पूजयेत् ततः

त्रिकोणं तद्बहिः षट्कोणं पात्रमध्ये संलिख्य स
मस्तमूलमन्त्रेण संपूज्य वरुणबीजं मूलमं
त्रं विलोममातृकां च पठन् तदस्य कारणा
मृतेन त्रिकोणं संपूर्य जलेन भागमेकं पूर
येत् ततो हृद्बीजेन रक्तपुष्पबिल्वपत्रना
नागन्धद्रव्याणि तत्र निक्षिप्य तत्र सोममं
डलं पूजयेद्यथा अं अमृतायै नमः आं मान
दायै नमः इं पूषायै नमः ईं तुष्ट्यै नमः उं पु
ष्ट्यै नमः ऊं रत्यै नमः ऋं धृत्यै नमः ॠं शशि
न्यै नमः लृं चन्द्रिकायै नमः लॄं कान्त्यै नमः
एं ज्योत्स्नायै नमः ऐं श्रियै नमः ओं प्रीत्यै न
मः औं अङ्गदायै नमः अं पूर्णायै नमः अः
पूर्णामृतायै नमः इति नमोन्तेन संपूज्य
सोममण्डलाय षोडशकलात्मने नमः इ
ति पूजयेत् ततः पूर्ववत् मन्त्रं कारणे विलिख्य
त्रिकोणरेखायां अं १६ कं १६ थं १६ इति वि
लिखेत् ततो मूलं त्रिखण्डं त्रयेण त्रिकोणं संपू
ज्य षट्कोणे षडङ्गं च पूजयेत् ततो गणेशे
साद्यर्कमण्डलान्तोर्थमावाह्य आनन्दभैरवमा
नन्दभैरवीं च तन्मन्त्रेण संपूज्य पूर्वादिक्रमेण

पुष्पा॰ २॰ ३२
32

पंचरत्नं पूजयेद्यथा ह्लूं गगनरत्नेभ्यो नमः
ह्लूं स्वर्गरत्नेभ्यो नमः ह्लूं पातालरत्नेभ्यो न
मः ह्लूं मर्त्यरत्नेभ्यो नमः मध्ये ह्लूं नागर
त्नेभ्यो नमः इति पूजयेत् ततो द्रव्यमध्ये मां
समीनमुद्राकुण्डगोलादिकं च संशोध्य नि
क्षिपेत् तेषां शुद्धिर्यथा तत्र मांसं त्रिविधम्
तदुक्तं यामले मांसं च त्रिविधं चैव जलेखेच
रम्भूचरम् गोमेषमाखमहिषवराहाजमृ
गोद्भवम् महामांसाष्टकं प्रोक्तं देवताप्रीति
कारकम् अभावे तदनुकल्पं लवणार्द्रकपि ला॰
ण्याकगोधूममाषपंचकम् लशुनं च मदे
शानि मांसप्रीतिविधौ स्मृतम् ॐ प्रतद्विष्णु
स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुव
नानि विश्वा इति मांसं शोधयेत् ततो मीन
शुद्धिः मीनं च त्रिविधम् तदुक्तं यामले मत्स्यं
च त्रिविधं ज्ञेयमुत्तमाधममध्यमम् त्रिविधं
चैव देवेशि शालपाठीनरोहितैः पाठीनं कं
टकैर्हीनं तैलाक्तं स्वादुसंयुतम् देव्याः प्रीति
करं चैव मध्यमं तु चतुर्विधम् द्व्यग्राणि तानि स

वीणाचायमामामाकृरुतमाः ॐ त्र्यंबकं यजा
महे सुगंधिं पुष्टिवर्धनम् उर्वारुकमिव बंध
नान्मृत्योर्मुक्षीय मामृतात् इति मीनशु
द्धिः अथ मुद्राशोधनम् ॐ ह्रीं पंचमंडलाका
रं चंद्रबिंबनिभं शुभम् चारुरूपमनोहारि
शर्कराद्यैः प्रपूरितम् पूजाकाले देवताया
मुद्राख्या परिकीर्तिता भक्ष्यार्थमादिकं यच्च
सर्वाणीयं प्रदर्शयेत् तेषां संज्ञा कृता मुद्रा
महामुद्राप्रवर्धिनी अथैनतशुद्धिः ॐ तद्वि
ष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव च
क्षुराततम् तद्विप्रासो विपन्यवो जागृवां
सः समिंधते विष्णोर्यत्परमं पदम् इति मुद्रा
शोधनम् ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रू
पाणि पिंशतु आसिंचतु प्रजापतिर्धाता ग
र्भं दधातु ते गर्भं धेहि सिनीवालि गर्भं धेहि
सरस्वति गर्भं ते अश्विनौ देवावाधत्तां पुष्क
रस्रजौ ॐ ह्रौं क्लिं क्रौं फुं सः अमृते अमृतोद्भ
वे अमृतेश्वरि अमृतवर्षिणि अमृतं स्राव
य स्रावय स्वाहा इति कुंडगोलोद्भवादिशु
द्धिः ततः सर्वं कृ सर्वं मयेनमुद्रयाऽमृ
नि

पृथा॰ १॰ ३३
33

तीकृत्य तालत्रयं दिग्बंधनं च कृत्वा तदुपरि मू-
लमंत्रं यथा जपेत् ऐं ह्रीं श्रीं सौः ब्रह्माण्डं विदं सम्भू-
तमशेषं रसपूरितम् आपूरितं महापात्रं पी-
यूषरसमावह अथ बिंदुं करस्थानंदकरे पर॰
स्यात्मनि स्वच्छंदस्फुरणाम् अत्र निधेह्यकुल-
रूपिणि अकुलस्थामृताकारे सिद्धिज्ञानक-
रे परे अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्न-
रूपिणि तद्रूपेणैकरस्यं च कृत्वा ह्येतत्स्वरू-
पिणि भूत्वा परामृताकारं मयि विस्फुरणं
कुरु अनेन कारणमामंत्र्य तत्र देवीमावा-
ह्य तालत्रयं दिग्बंधनं कृत्वा ऽवगुंठनमुद्रया
ऽवगुंठयेत् मुद्रया अमृतीकृत्य योनिमुद्रां प्रद-
र्श्य ह्रीं नमः इति संस्पृश्य धेनुमुद्रां प्रदर्श्य
षडङ्गेन सकलीकृत्य मत्स्यमुद्रया पात्रमाच्छा-
द्य मूलमंत्रं दशधा जप्त्वा देवीस्वरूपं पात्रं वि-
भावयेत् पात्रं च पूजासमयपर्यंतमचलितं न
कार्यम् अथावगुंठनमुद्रा यथा ज्ञानार्णवे
सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी
अवगुंठनमुद्रेयमभितो भ्रामिता सती इति
मुद्रा तत्र वीक्षा अथ योनिमुद्रा तदुक्तं ज्ञाना-

लिवे मध्यमे कुटिलाकारे तर्जन्युपरि संस्थिते
अनामिके मध्यगते तथैव हि कनिष्ठके सर्व
पवात्र संयोज्याङ्गुष्ठपरिपीडिताः योनि
मुद्रा समाख्याता त्रैलोक्योत्पत्तिमातृका
वामाङ्गुष्ठेन चाङ्गुष्ठं नियोज्य सकलाङ्गुलीः
दक्षिणस्य करस्यैव वामाङ्गुष्ठेन संस्पृशेत्
शंखमुद्रा समाख्याता मंत्रविद्भिः सुपूजिता
देवतांगे षडंगं च सकलीकरणं भवेत् दक्ष
पाणिहृद्देशे वामपाणितलं क्षिपेत् ततो
देव्याज्ञां गृहीत्वा घट श्रीपात्रयोर्मध्ये पात्रा
णि स्थापयेद्यथा घटसमीपे गुरुपात्रं ततः
शक्तिपात्रं वलिपात्रं स्वपात्रं पाद्यपात्रं
अर्घ्यपात्रं आचमनीयपात्रं च क्रमेण स्थाप
येत् सामान्यार्घ्यपात्रं ततो मत्स्यमांसयुत
कारणेन तत्त्वमुद्रया श्रीपात्रात्समुद्धृत्य आ
नंदभैरवं तर्पयामीति तन्मंत्रेण संतर्प्य त
तः अमृतकानंदनाथगुरुपादुकां तर्पयामी
ति त्रिः सकृद्वा संतर्पयेत् ततः श्रीपात्रामृते
न चैवं देवीं सायुधां सवाहनां सपरिवारां हृ
दि संतर्पयेदिति तत्त्वमुद्रा यथा तदुक्तं सा

पृणा. २. ३४ ततं अंगुष्ठानामिकायोगाद्वामहस्तस्य पार्श्वे।
ति तर्पयेत्सायुधां देवीं कालिकां सपरीकराम्
ततः तत्वशुद्धिं कुर्यात् तदुक्तं कालिकाश्रुतौ
34 ॐ प्राणापानव्यानोदानसमाना मे शुध्यन्ताम्
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा १
ॐ पृथिव्यप्तेजोवाय्वाकाशानि मे शुध्यन्ताम्
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा २
ॐ त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे शुध्यन्ताम्
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ३ ॐ
पाणिपादपायूपस्थशब्दानि मे शुध्यन्तां ज्यो
तिरहं विरजा विपाप्मा भूयासं स्वाहा ४ ॐ प्र
कृत्यहंकारबुद्धिमनःश्रोत्राणि मे शुध्यन्ताम्
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ५
ॐ स्पर्शरूपरसगंधाकाशानि मे शुध्यन्तां ज्यो
तिरहं विरजा विपाप्मा भूयासं स्वाहा ६ ॐ वा
युतेजःसलिलभूम्यात्मानो मे शुध्यन्तां ज्योति
रहं विरजा विपाप्मा भूयासं स्वाहा ७ इति सम
मंत्रात्मकेदिति तत्वशुद्धिः ततो मूलमंत्रेण स्व
पात्राद्धिं दृढीकारं कुर्यात् ततः श्रीपात्रामृते
नात्मानं पूजोपकरणानि चाभ्युक्ष्य ततस्मात्म

र्वैव्रलमयंभवेदिति ततस्त्रकस्यपूर्वदक्षिण
पश्चिमोत्तरे त्रिकोणं कृत्वा विलिख्य ॐ ह्रीं क्रूं मं
डलाय नमः इति मंडले संपूज्य पूर्वे वं वटु
काय नमः इति पाद्यादिभिः संपूज्य अर्घपात्र
स्थसलिलमांसमीनपृष्ठैर्वलिमुपस्कृत्य
वलिपात्रस्य कारणेन वामांगुष्ठानामिका
भ्यामुत्सृजेदनेन एह्येहि देवीपुत्र वटुकना
थ कपिलजटाभारभास्वर त्रिनेत्र सर्वविघ्ना
न्नाशय सर्वोपचारसहितं वलिं गृह्ण गृह्ण
स्वाहा एष वलिर्वटुकाय नमः दक्षिणे यो
योगिनीभ्यो नमः इति योगिनीः समर्च्य त
र्जनीमध्यमानामिकांगुष्ठैर्वलिं दद्यादनेन
ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले निष्कले भूतले
वा पाताले वा वने वा सलिलपवनयोर्यत्र कु
त्र स्थिता वा क्षेत्रे पीठोपपीठादिषु च कृत
पदा धूपदीपादिकेन प्रीता देव्यस्सदा नः
शुभवलिविधिना पान्तु वीरेन्द्रवन्द्याः यां यो
गिनीभ्यः स्वाहा सर्वयोगिनीभ्यः हुं फट् स्वाहा
एष वलिर्योगिनीभ्यो नमः पश्चिमे क्षां क्षे
त्रपालाय नमः इत्यभ्यर्च्य वामपृष्ठिं कृत्वा

पू०
र०
३५
35

ततो नीं सरलां विधाय पुनर्बलिं दद्यादनेन ह्रां
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः स्थानक्षेत्रपाल धूपदीपादि
सहितं बलिं गृह्ण गृह्ण स्वाहा एष बलिः क्षे
त्रपालाय नमः उत्तरे गां गणेशमभ्यर्च्य दं
डाकाराङ्गुलीर्मध्ययुक्ताः कृत्वा पूर्ववदंज
लिं दद्यादनेन गां गीं गूं गैं गौं गः गणपतये व
रवरद सर्वजनं मे वशमानय बलिं गृह्ण गृ
ह्ण स्वाहा एष बलिर्गणेशाय नमः अथ
वायव्यां मण्डलं कृत्वा पूर्ववत्संपूज्य तत्रा
साधारबलिं संस्थाप्य मूलेनाभिमन्त्र्य तत्र धू
पदीपादिना सर्वान्भूतान्संपूज्य ह्रीं सर्ववि
घ्नकृद्भ्यः सर्वभूतेभ्यः हुं फट् स्वाहा एष बलिः
सर्वभूतेभ्यो नमः इति तत्वमुद्रया उत्सृजेत
एतस्यैव बलिं कुर्यात् ततः शैववस्त्रं उंगं विधा
य कामकलां ध्यात्वा तरुणदिवाकरारुण
कुसुमाञ्जलिं कूर्ममुद्रया गृहीत्वा मूलाधा
रात्कुण्डलिनीं ब्रह्मलयपथा परमशिवपर्यन्तं वि
भाव्य हृदयाष्टदले समानीय मूलेन मूर्तिं क
ल्पयेत् तदुक्तं तन्त्रान्तरे देवीं स्वसुषुम्णामार्गे।
णानीय ब्रह्मरन्ध्रकम वामनासापुटीय

त्वा निर्यातं स्वांजलिस्थितम् पुष्पमारोप्य तत्स
र्वं प्रतिमादौ निधापयेत् वीरतंत्रेऽपि ततः पू
र्वोक्तरूपां तां ध्यायेच्चैव हृदि दक्षिणाम् योगि
नीचक्रसहितां महाकालसमर्चिताम् का
लीतंत्रेऽपि ततो हृदयपद्मात् स्फुरन्तीं परमां
कलाम् यंत्रमध्ये समावाह्य मासजालप्रवि
न्यसेत् कुमारीकल्पेऽपि ततो हृदयपद्मात्
स्फुरन्तीं विद्युदाकृतिं सुषुम्णावर्त्मना नीत्वा
शिरस्थाने महेश्वरीम् ततो वै हृदयात्सन्नेत्र पु
ष्पान्तरमथानयेत् नासया वामया देवि वायु
बीजेन मंत्रवित् देवेशीति च मंत्रेणाविद्यावा
हयेत्सुधीः अथ पूर्वोक्तरूपां ध्यात्वा हृत्पात
रमिवशिवे संयोज्य मिवशिवे संयोजमिति
वायुबीजेन वामनासापुटेन देवीं स्वहृदयात्कु
सुमांजलिमानीय यंत्रमध्ये समावाहयेदत्ते
न देवेशि भक्तिसुलभे परिवारसमन्विते याव
त्त्वां पूजयिष्यामि तावद्देवि इहावह इति यंत्रम
ध्ये देवीं संस्थाप्य आवाहयेद्यथा श्रीमहाका
लसहिते दक्षिणे कालिके इहागच्छ इहागच्छ
इह तिष्ठ इह तिष्ठ इह सन्निहिता भव इह सन्नि

हिता भव इह सन्निरुद्धा भव इह सन्निरुद्धा
भव मम पूजां गृहाण गृहाण स्वाहा । ए
वं जीवन्यासं लीलिहानमुद्रया कुशाविष्टवे
णवा कृत्वा कृ[illegible] अवगुण्ठ्य सकलीकरणं पर
मीकरणं च कृत्वा छोटिकाभिर्दशदिग्बंध
नं विधायाया ऽमृतीकुर्यात् अथावाहनमुद्रा
तदुक्तं दक्षिणामूर्तिसंहितायाम् ऊर्ध्वांजलिं
ततः कुर्यादियमावाहनी भवेत् इयं तु विपरी
तास्यानदावैस्थापनी भवेत् ऊर्ध्वांगुष्ठमुष्टियु
ग्मं तदियं सन्निधापनी अंतरांगुष्ठमुष्टिस्था
तदियं स्यान्निरोधिनी लीलिहानमुद्रायथा
तर्जनीमध्यमानामासमं कुर्यादधोमुखम्
अनामासान्निपहृत्वा ऊर्ध्वं कृत्वा कनिष्ठकाम्
लीलिहाना नाम मुद्रेयं जीवन्यासे प्रकीर्तिता दे
वतां [illegible] षडंगं च सकलीकरणं भवेत् ततो यो
निमुद्रां खड्गांकुशडमरुवराभयपरश्वानी दर्शयित्वा
प्रतिचक्रे रश्मिमुद्रया देवता आवाहयेत् तदुक्तं
स्वतंत्रे देवीं ध्यात्वा समावाह्य योनिमुद्रां प्रद
र्शयेत् खड्गांकुशवराभीतिपरशूनि च दर्शये
त् ततश्च प्रतिचक्रेषु देवीरावाहयेत् सुधीः

अथ योन्यादिमुद्रा यथा कनिष्ठानामिकां बद्धा
अंगुष्ठेनैव दक्षतः शेषांगुलीः प्रसृते संश्ले
षिन्मुद्रिका अंतरांगुष्ठमुष्टिं च कृत्वा वामक
रस्य च मध्यमाभ्यां दक्षिणस्य तथालंब प्रथ
न्नतः मध्यमेनाथ तर्जन्यामंगुष्ठाग्राग्रमास्त
था तद्दक्षिणयोजयेत्पार्ष्णिं वाममुष्टेस्तस्याथ
कः दर्शयेद्दक्षिणे भागे मुंडमुद्रेयमुच्यते वर
दाभयमुद्राश्च वरदाभयवत्कुरु तर्जन्यनामि
के मध्ये कनिष्ठादिक्रमादपि कारयोर्योजये
देकं कनिष्ठामूलदेशतः अंगुष्ठाग्रं तु नि
क्षिप्य महायोनिः प्रकीर्तिता। अथ रश्मिसं
दद्देवता यथा काली प्रभृतौ काली कपालिनी
कुल्ला कुरुकुल्ला विरोधिनी विप्रचित्ता उग्रा
उग्रप्रभा दीप्ता नीला घना बलाका मात्रा मु
द्रा मिता एता दश पंचकोणगताः इति अथ स
र्वासां ध्यानं यथा तदुक्तं नीलतंत्रे सर्वाः श्या
मा असिकरा मुंडमालाविभूषणाः तर्जनीं वा
महस्तेन धारयंत्यः सुविस्मिताः इति पूर्वादि पं
चदशकोणेषु क्रमेण ध्यात्वाऽवाह्य पूर्वाद्यष्ट
दले ब्राह्म्यादिका ध्यात्वाऽवाहयेत् ब्राह्म्यादि

पूमा· १· ३०
37

कापथ्या तद्वत्कुलसद्भावे वह्निमंडलतस्था
पि ब्राह्मी नारायणी तथा माहेश्वरी च चामुं
डा कौमारी चापराजिता वाराही च तथा ए
न्द्री नारसिंही तथैव च अथ ध्यानम् यथा
ब्राह्मीं हंससमारूढां स्वर्णवर्णां चतुर्भुजाम्
चतुर्मुखीं त्रिनेत्रां च ब्रह्मकूर्चं च पंकजम्
दंडं पद्माक्षसूत्रं च दधतीं चारुहासिनीम्
जटाजूटधरां देवीं भावयेत्साधकोत्तमः
नारायणीं महादीप्तां श्यामां गरुडवाहना
म् नानालंकारसंयुक्तां चारुकेशीं चतुर्भु
जाम् घंटां खड्गं कपालं च चक्रं संदधतीं प·
राम् मधुमत्तां मदोल्लासिहृष्टां सर्वांगसु
न्दरीम् माहेश्वरीं वृषारूढां शुक्लां त्रिनय
नान्विताम् टंकं च दधतीं देवीं नानाभर·
णभूषिताम् चामुण्डां साट्टहासां विक
टितदशनां भीमवक्त्रां त्रिनेत्राम् नीला
म्भोजप्रभाभां प्रमुदितवदनां मुण्डमा·
लाविभूषाम् खड्गं मुण्डं कपालं नरश
वघटितं खेटकं धारयन्तीम् प्रेतारू·
ढां प्रमत्तां मधुमद ॥

उदितां भावयेच्चैन्द्ररूपाम् कौमारीं कुंकुमाभां
च त्रिनेत्रां शिखिसंस्थितां चतुर्भुजां शक्तिपा
शांकुशाभयधारिणीम् नानालंकारसंयु
क्तां प्रसन्नां परिचिंतयेत् अपराजितां च पीता
भां मत्तसूत्रवरप्रदाम् कमले मातलुंगं च द
धतीं परिचिंतयेत् वाराहीं धूम्रवर्णां च शूकरव
दनां शुभाम् फलकं खड्गमुसले हलं वै दधु
जैर्धृताम् नारसिंहीं नृसिंहस्य विभ्रतीं सदृशी
वपुः अत्र पूर्वादिक् यत्र रवेरुदयः किमस्य
वा पूज्यपूजकयोरंतः नाद्यः अत्रागमे सर्वदे
वतापूजने पूज्यपूजकयोरंतरेव पूर्वादिक्
न त्वन्या विशेषवचनात् तदुक्तं शारदाटीका
याम् यद्येव भागस्त्वयि यदुदेति प्राचीति तां वेद
विदो वदंति अथापरां पूजकपूज्ययोस्तु सदाग
मज्ञाः प्रवदंति तावत् अत्यन्त देवीसाधकयो
रंतः पूर्वादिदिग्मिहोच्यते इति तन्त्रांतरेपि हो
तुः पूर्वे पूर्वभागमुदिष्टं सव्यभागे दक्षिणभाग
माहुः दक्षे विद्यादुत्तरं भागमग्रे प्रत्यग्विदुः
पश्चिमं भागमुक्तम् अयमस्वमिति सम्य
ग्विदिगित्यर्थः एतेन देवतापृष्ठमेव प्रतीची

पूपा. दिशीति बोद्धव्यम् यत्र पुरंदरमुखोमैत्री पू
२. जयेत्सुंदरीसदा देवीपश्चात्ततःप्राचीप्रती
३८ चीत्रिपुराप्रभुः इतिज्ञानार्णव वचनम् तत्रि
38 पुराविषयेबोद्धव्यम् देवीमात्रविषयकल्प
नेमानाभावात् वचनांतरदर्शनाच्च तदुक्तं
संग्रहे स्वसम्मुखमेवप्राचीदेवीपृष्ठंतुपश्चि
मम् सव्यंचदक्षिणंविद्याद्दक्षिणंसव्यमेवचेति
अथैवंविधिनासर्वदेवता आवाह्यस्वात्मतमू
लेति श्रीमहाकालसंहितोक्तदक्षिणकालिकां
तर्पयामीतित्रिःसंतर्प्यपिता षोडशोपचारद
शोपचारपंचोपचारैर्वामूलदेवींपूजयेत् त
दुक्तंस्वतंत्रे आवाहयेत्त्रिदलेमूलदेवींचत
र्पयेत् तर्पयेत्कालिकांदेवींसायुधांसपरिक
राम् पाद्यादिभिर्मूलदेवींसम्पूज्यतर्पयेत्ततः
अथषोडशोपचारैर्यथा तदुक्तंमंत्ररत्नावल्यां
पाद्यार्घ्याचमनीयस्नानवसनभूषणं गंधपु
ष्पधूपदीपनैवेद्याचमनंतथा तांबूलमर्चनास्तो
त्रंतर्पणंचनमस्क्रिया प्रयोजयेदर्चनायामुप
चारांस्तुषोडश आसनंस्वागतंपाद्यमर्घ्यमाचम
नीयकं मधुपर्काचमनस्नानंतथावसनभूषणे

स्रगंधस्नमनोधूपदीपनैवेद्यचंदनान् प्र
योजयेदर्चनायामुपचारांस्तु षोडश दशोप
चारान्यथा अर्घ्यपाद्यनिवेद्याथतथैवाचम
नीयकम् मधुपर्काचमेचैवगंधप्रसूनके
ततः धूपदीपौचनैवेद्यंदशोपचारकंस्मृत
म् पंचोपचारिका अथपूजायांविशेषोयथा
कालीकल्पे श्रीपदंपूर्वमुच्चार्यपादुकापदमु
च्चरेत् पूजयामिततः पश्चात्पूजयेदंगदेवताः
कल्पोदिताःपूजनीयाःक्रमेणपरमेश्वरि स्वा
हाहोमेतर्पणेचतर्पयामीतिसंस्मरेत् अथ
मूलमंत्रमुच्चार्य एतत्पाद्यंमहाकालसहित
श्रीदक्षिणकालिकायैनमः पादयोःपाद्यंप
वं अर्घ्यंस्वाहा शिरसि आचमनीयं मधुपर्कं
च स्वधामुखे स्नानीयंनमः सर्वांगे इतिस्नात्वा
प्यशुद्धवस्त्रेणगात्रमार्जनंकृत्वा विचित्रपट्टवस्त्र
कस्तूरीकुंकुमचंदनसिंदूरमुकुटकुंडलहार
त्रयादिनानालंकरणानिदत्वापुनराचमनी
यंक्रमेणदद्यात् तदुक्तंतंत्रांतरे पाद्यंचपाद
योर्दद्यान्नमोंतेनचमंत्रवित् शिरोमंत्रेणदेवे
शिअर्घ्यंदद्याच्छिरोपरि आचमनंमधुपर्कंस्वधा

पपा· मंत्रेणैवमुखे स्नानं गंधं हृदा दद्यात्सुच्छालि
२· वौषडिति च नमो निवेदयामीति सर्वदया
३९ न्महेश्वरि स्वधर्मेणेति वमिति वरुणमंत्रेण
39 त्यर्थः तदुक्तं शारदाटीकायाम् मधुपर्कमु
क्लेदयानलमंत्रेण देशिक इति ततो मध्यमा
नामिकाग्रगृहीतं गंधो नमः इति गंधः अंगुष्ठ
तर्जनीभ्यां पुष्पाणि वौषट् इति पुष्पैः संपूज्य
सात्त्वात्स्वयंभुक्तं क्षमे दत्वा धूपपात्रं फडिति सं
पूज्य पुरतः स्थापयित्वा कमतर्जमासंस्पृशन्
श्रीपाद्यास्तेन धूपं निवेदयामीति निवेद्य ज
गद्धनि मंत्रमानः स्वाहा इति घंटां संपूज्य वा
मेन घंटां वादयन् मध्यमानामिकाग्रहे धूपं
धूपामायन् श्रीमूलमंत्रं च पठन् त्रिःस्तोलनेक
नादेवी धूपयेत् ततो दीपं संमुखे संस्थाप्य
देवस्योत्तलगे पूजने क्रनावामसमध्यमयादी
पपात्रं स्पृशन् दीपं निवेदयामीति निवेद्य ए
वं घंटां वादयन् मध्यमानामिकाभ्यां दी
पपात्रं संगृह्य नखादर्शयेत् ततो नैवेद्यं हव
णादिपात्रे संस्थाप्य क्रं त्सवंगुरुव वमिति पेत
सुदया ःमृती हुं मूलं संमयाजमवा ।:।:

वामांगुष्ठेन नैवेद्यपात्रं स्पृशन् नैवेद्यं निवे
दयामीति दत्त्वा हस्तानामिकांगुष्ठाभ्यामुत्सृ
जेत् ततः पुनराचमनीयं दत्त्वा कर्पूरादियुक्तं
ताम्बूलं निवेदयामीति पूर्ववद्दद्यात् सर्वेषा
मर्घ्यपात्रजलेनोत्सर्गः कार्यः ततस्तत्त्वमुद्र
याचार्घ्यस्थेन देवीं त्रिः संतर्प्य पूर्ववद्योनिमु
द्रादिकं दर्शयेत् तदुक्तं तंत्रांतरे मध्यमाना
मिकाभ्यां त्वंगुष्ठाग्रेण पार्वति दद्याच्च वि
मलं गंधं मूलमंत्रेण साधकः अंगुष्ठतर्ज
नीभ्यां तु चक्रे पुष्पं निवेदयेत् यथा गंधं तथा
देवि धूपं दद्याद्धि विचक्षणः मध्यमानामिकाभ्यां
तु मध्यपर्वणि देशिकः अंगुष्ठाग्रेण देवेशि ध
त्वा धूपं निवेदयेत् ततो लनेत्रिधा कृत्वा गाय
त्र्या मूलयोगात् ततः तं स्वात्ममुद्रया देवि नैवेद्यं
तु निवेदयेत् मूलेनाचमनं दत्त्वा ताम्बूलं तेन
मुद्रया तेन तत्त्वेनेत्यर्थः शारदाटीकायाम्
धूपभाजनमंत्रेण प्रोक्ष्याभ्यर्च्यास्त्रदामुना मं
त्रेण पूजितां घंटां वादयेत् त्रिगुणं वदेत् अन्य
त्रापि जगद्ध्वनि ततो मंत्रमातः स्वाहेत्युदीर्य
च अभ्यर्च्य वादयन् घंटां धूपं धूपयेत् ततः ते

पूजा. १. ५.
40

न्त्रांतरेव ततः समर्पयेद्धूपं वं दीपं वा पूजयस्वेने
रिति एवं दीपदाने घण्टावादनमिति टी
काकारः निवेदयेत्पुरोभागे गंधपुष्पं वसू
क्षणम् दीपं दक्षिणतो दद्यात्पुरतो वामत
स्तथा धूपमग्रे वा वामे न तु दक्षिणे वामे
पुरतो वा न पृष्ठतः घृतदीपं दक्षिणे तैल
दीपं वामत इति साम्प्रदायिकम् एवं
सितावर्तिश्च दक्षिणतः रक्ता चेद्वामत
इति टीकाकारः सम्भवे न नियमः वाम
दक्षिणभागे तु देवताया एव न तु साध
कस्य वचनान्तरदर्शनात् धूपदीपौ च
भोज्यं च देवताग्रे निवेदयेत् नैवेद्य
मिति स्विन्नं चेद्देवतावामे आमं चेद्द
क्षिण इति वोढव्यम् अत्र पुष्पादि
नियमो यथा मत्स्यसूक्ते स्वर्गार्थि
श्वेतलोहितं कुसुमैरर्चयेत्कुलेः

विल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः भ
क्ष्यभोज्यैर्विशेषेण क्षत्रभक्ष्येण मिश्रितम् स
र्वं पूज्यं प्रदद्याच्च भक्तियुक्तेन चेतसा शारदा
टीकायाम् सर्वैः पुष्पैस्सदा पूज्या विहिता वि
हितैरपि कर्तव्या सर्वदेवानां भक्तियोगैस्त्रिका
रणम् देवानामिष्टुपललक्षणा देवीनामपि
वोद्धव्यम् तद्युक्तेनैवान्तरे देवी पूज्या सदा का
र्या नवलैः फलैरपि विहितैर्वा निषिद्धै
र्वा भक्तियुक्तेन चेतसा नानोपहारबलिभि
र्नाना पुष्पैर्मनोरमैः अपामार्गदलैर्भंगैस्तु
लसीदलवर्जितैः पूजनीया सदा भक्त्यान्ये
णां शीघ्रफलाप्तये अथ पुष्पदानविधाने यथा
दिवा पत्रं फलं नैवेद्यमथोमत्वविंदुः स्वेदं तस्य
मात्यान्त पुष्पपत्रं तथार्पणम् अथोमत्वं फ
लं नैवेद्यं पुष्पाञ्जलिविधानेन अथ नैवेद्यय
था तद्युक्तं मत्स्यसूक्तेः पायसं कृसरं दध्यक्ष
कं रागुडमिश्रितम् गव्यं मत्स्यं मधुपर्कस्तथा
न्यानि निवेदयेत् शालमत्स्यं च पाठीनं गो
धामांसमनन्तमम् अन्नं च मधुनायुक्तं घृता
दद्याच्च मंत्रवित् कृसरं मिश्रितं तंदुलमि

पूजा· १· ४१ 41

सर्व्वः अन्यत्रापि कंडुपक्वं स्नेहपक्वं घृतपक्वं
तथा पायसम् मनःप्रियं चैव नैवेद्यं कुर्य्याद् देवि पुनः
पुनः कंडुपक्वं पिष्टतण्डुलादि स्नेहपक्वं लड्डु
कादि कुमारीकल्पेपि ताम्बूलं च सकर्पूरं ना
रिकेलं सशर्करम् पायसं सघृतं चैवार्द्रकं
सगुडं तथा सतण्डुलं तिलं चैव दधि चैव सशा
र्करम् जंबीरं पनसं चैवाम्राम्रातकफलं तथा
कदलीं तिन्तिलीं चैव श्रीफलं फलमुत्तमम्
कलंजकफलं चैव तालखर्जूरमेव च अन्यानि
च सुगंधीनि स्वादूनि च फलानि च नराः खगा
स्तथा मेषा महिषाः शशकास्तथा एतेषां चैव
रक्तानि देयानि परमेश्वरि नरबलिदानं च महा
भक्तानां कार्य्यं नान्येन सर्व्वः तदुक्तं यामले राजा न
रबलिं दद्यात् नान्योपि परमेश्वरि नैवेद्यपात्रं च या
मले तैजसं मृच्चपात्रं सौवर्णं राजतं तथा वा
ताम्रं वा प्रस्तरं वापि पर्णपात्रं तथा वा ततः यस्तदा
रुमयं वापि नैवेद्यं कल्पयेत्तु यः सकामो भवेत्मा
हेयं स्वहस्तचरितं यदि येनापि मृत्पात्रेण तत्रि
यावनिवेदयेत् अन्यतोपि तु सुष्ठु मृत्पात्र
स्थितैतरैः नरहतानि महादेवीदत्तं विशिष्यशोतरपि
अर्घ्यपात्रभेदो न कृतः

श्रीतत्त्वचिन्तामणावनुसंधेयः अथ कृतांज
लिः श्रीदक्षिणेश्वावरणेन पूजयामीति आ
ज्ञां गृहीत्वा अग्नीशासुरवायव्यमध्यदिक्षु,
गपूजनम् तेजांतरेच रक्षाहृदयमाग्नेय्या
मैशान्यां च शिरो यजेत् नैर्ऋत्यां च शिखां पू
ज्यां वायव्यां कवचं यजेत् अस्त्रं चैव रतौ ने
त्रं दिक्षु चाप्यमर्चयेत् अपि च वह्न्यादिदि
क्षु पूज्याः स्युस्तत्तदंगेषु वा क्रमात् आसां ध्या
नं यथा तुषारस्फटिकश्यामनीलकृष्णा
णत्विषः वरदाभयधारिण्यः प्रधानतनवः
स्मृताः अथ गुरुपंक्तिं यजेत् तदुक्तं शारदा
टीकायाम् वायव्यादीशपर्यन्तं गुरुपंक्ति
समर्चयेत् तद्दशाकौ गुरुत्रयपूर्षिमंत्रेवा
तदुक्तं तंत्रचूडामणौ मातर्देवि महामा
येवं यमोत्तप्रवर्तिनि इदानीं श्रोतुमिच्छा
मि गुरुक्रममनुत्तमम् श्रीदेव्युवाच गुरु
क्रमं तु वक्ष्यामि त्वविस्तारयोगवान् काला
नामुपनादिना कथितं कथयामि ते अस्मा
त्तु गुरुकुले देवनष्टमार्गो भविष्यति नष्ट
मार्गास्तु त्रिविधेन तत्र कफलयोगावे गुरु

पुपा. ५. ४२ 42

णां शिष्यभूतानां नास्ति चेत्संततिक्रमः तत्र
मंत्रास्य विद्यास्य निष्फला नात्र संशयः विंश
तिपुरुषान्व्यापि नव सप्त त्रयोपि वा भूत्वा
गुरुवंशात्तां शिष्यस्य नष्टसंततिः स्ववंशा
दधिकं ज्ञेयं गुरुवंशं महाशुभम् जनकाद
धिको ज्ञेयो मंत्राणां महेश्वरः तस्मात्सर्व
त्र देवेशं संतोषाद्गुरुतां नयेत् आद्यो स
र्वत्र देवेशः मंत्रदः परमो गुरुः परापरगु
रुस्त्वन्यः परमेष्ठी रहं ततः सर्वतंत्रेषु विद्यास्व
स्वयं प्रकृतिरूपिणी ततः पुरुषरूपा च ततः
स्वगुरुसंततिः तेनैवाहं मंदशास्त्र समस्ता
स्य विशेषतः सर्वमंत्रेषु परतः सर्वसिद्धिप्र
दायकाः दिव्यौघांस्तु समासेन कथया-
मि तवाग्रतः तत्रादौ कालिका देवी तस्याः
श्रीगुरुक्रमम् महादेवी महादेवस्त्रिपु
रश्चापि भैरवः दिव्यौघाद्गुरवः प्रोक्ताः सि-
द्धौघं कथयामि ते ब्रह्मानंदः पूर्णदेवश्च
लचित्तश्चलाचलः कुमारः क्रोधनश्चैव व
रदः स्मरदीपनः मायामायावती चैव मा
नवौघं शृणुष्व मे विमलः कुशलश्चैव भीम

मीनः सुधाकरः मीनो गोरक्षकश्चैव भोजदेवः
प्रज्ञापतिः मूलदेवान्तिदेवौ च विघ्नेश्वरो हुता
शनः समयानंदसंतुष्टौ कालिकागुरवः ।
स्मृताः अन्यविशेषोपष्ठा तदंतंतांतरे दे
वावसंति विनिस्पसिद्धाम्मा विज्ञापिव मा
नवौघामानवेष्वममनूपयगास्सदा आनंद
नाथशाह्नाता गुरवः सर्वसिद्धिदाः स्त्रियोपि
गुरुरूपाश्च अंतांताः परिकीर्तिताः मानवौ
घांतरे देवि सर्वगुरूं परिक्षजयेत भावचूडाम
णौ अथवा सर्वशास्त्रेषु गुरवः पर्वसूचिताः
कुलचूडामणौ देव श्रृणु वत्स समाहितः ये
षु येषु च मंत्रेषु ये ये ऋषिगणाः स्मृताः ते
ते पूज्याः सपर्यादौ संते योगादितो मया अ
ज्ञानात् कुलमार्गावे गुरुस्त्रितयमर्चयेत चा
त्वष्टयं वासंकोचो न च कार्यस्ततः परम्
गुरुः परमगुरुश्चैव कामदा गुरवः स्मृताः
गुरुपूजां विना वत्स यदि पूजां समाचरेत्
न दोषशमने वत्स कुलपूजां समाचरेत्
विघ्नं ण पत्रयनृणाव सगुणं कुलपूजनात्
कुलावलोकनं वत्स कुलवालनमार्जनम्

कृतस्नानं कृताशुद्धिः कृतन्यासविशोधनः पू
टीत्वा प्रभुः कुलीनान्तकुलेवा वटुकेश्वरः त
देहं गुरुमानीय कुलद्रव्यं गुरुं स्मरेत् कुलगु
रुर्यथा तत्र न तथा कुलसाधकः गुरुक्रम
श्च कथितो गोपनीयः प्रयत्नतः नदेयं यत्र
कुत्रापि पीठेगृहे च चतुर्वके पश्चाद्गृहे नचैव वर्णा
नामग्राहं कुलेश्वर वैष्णवे शाक्ते तन्त्रे वा गा
णपे सौरवा पुनः निजं गुरुं प्रणम्याथ त
तो गुरुं च तत्रेष्टयम् पूजयित्वा यजेद्देवं न च सं
कोचमाचरेत् अथ प्रयोगः महादेव्यां वा
श्रीपादुकाभ्यो नमः इति संपूज्य पूर्ववत्तर्प
येत् एवं क्रमेण गुरून् संपूज्य मानवो घो
ते गुरुं पूजयेत् तर्पयेच्च ततो रश्मिमहद
देवताः पूजयेद्यथा वाह्यत्रिकोणस्यांसेषु
वित्रिकोणे ॐ कालीश्रीपादुकां पूजयामि
नमः इति पाद्यादिभिः संपूज्य योगिनीपात्रा
मृतेन तत्त्वमुद्रया त्रिः सकृद्वा तर्पयेत्
एवं दक्षिणे ॐ कपालिनीश्रीपादुकां
वामे ॐ कुल्लां तदन्तस्त्रिकोणे ॐ कुरुकु
ल्लां ॐ विरोधिनीं ॐ विप्रचित्तां तदन्त

स्त्रिकोणे ॐ उग्रां ॐ उग्रप्रभां ॐ दीप्तां ततः त
स्त्रिकोणे ॐ नीलां ॐ घनां ॐ बलाकां ततः द
नत्रिकोणे ॐ मात्रां ॐ मुद्रां ॐ मितां पाद्या
दिभिस्त्रिः सम्पूज्य पूर्ववत्तर्पयेत् देव्या दक्षिणे म
हाकालं पूजयेत् तदुक्तं कुमारीकल्पे देव्या दक्ष
क्षिणे भागे महाकालं समर्चयेत् ततोऽष्टदले
पूर्वादिक्रमेणाष्टौ शक्तीः पूजयेद्यथा पूर्वे ब्रा
ह्मीं ब्राह्मीपादुकां पूजयामि नमः इति पाद्यादि
सि॰ भिः सम्पूज्य त्रिः तर्पयेत् अग्नौ ॐ ईं नारायणीं दक्षि
णे ॐ ऊं माहेश्वरीं नैरृत्ये ॐ ऋं चामुण्डां वा
रुणे ॐ लृं कौमारीं वायव्ये ॐ ऐं अपराजितां
उत्तरे ॐ औं वाराहीं ईशाने ॐ अः नारसिंहीं
पूर्ववत्पूजयेत्तर्पयेच्च तदुक्तं क्रमतो द्वितीय
चतुर्थषष्ठाष्टदशद्वादशचतुर्दशषोडशस्वर
भेदेन प्रथमे यन्त्रमध्ये आवाहनं नैवेद्यजनम्
कुमारीकल्पे ब्राह्म्याद्याः पूजयेत्सत्रेण ब्राह्म्यै भैर
वान्यजेत् लोकपालांस्ततो बाह्ये तदस्त्राणि
च तद्बहिः अत्र प्रयोगः पत्राग्रे पूर्वादिदक्षाव
र्तेन पूजयेद्यथा पं हेरुकवटुकभैरवं पं त्रि
पुरान्तकवटुकभैरवं पं वह्निवेतालवटुक

पूजा. भैरवं ऐं अग्निजिह्वबटुकभैरवं ऐं कालबटुक
१. भैरवं ऐं करालबटुकभैरवं ऐं एकपादबटुक
४४ भैरवं ऐं भ्रामरबटुकभैरवं पूजयेत्तर्पयेच्च
44 ततो वृत्ते इन्द्रादिलोकपालांस्तत्रास्त्रतदस्त्रा
णि च तर्पणानियमे यथा कुलार्णवे त्रिवारं
तर्पयेद्वापि सकृद्वापि यदृच्छयेति सर्वासा
मपि दातव्या बलिः पूजान्ते ध्येवच अनुलेपन
पुष्पं च धूपदीपौ च पानकम् त्रिविधैः पूजाप्र
कर्तव्या सर्वासामपि साधकैः ततो देव्या अस्त्र
पूजयेद्यथा ॐ देवीवामोर्ध्वहस्ते ॐ खड्गं अधो
हस्ते ॐ मुण्डं दक्षोर्ध्वे ॐ अभयं तदधः ॐ वरं पू
जयेत्तर्पयेच्च ततः षडंगन्यासं विधाय पूर्वव
द्देवीं ध्यात्वा गंधपुष्पाक्षतं तद्धूपदीपं दत्वा
पूर्ववद्घंटावादयन् धूपदीपादिकं दर्शयेत्
ततः पानादिद्रव्यं दत्वा पूर्ववच्चषकादिकं निवेद्य
त्रिस्तर्पयेत् ततः पुष्पांजलित्रयेण देवीं सम्पू
ज्य सायुधसवाहनसपरिवारमहाकालस
हितश्रीदक्षिणकालिकां पूजयामि नमः
इति पुष्पांजलित्रयेण त्रिः सम्पूज्य त्रिस्तर्पयेत्
ततो योनिमुद्रादिकं पूर्ववद्दर्शयेत् तदुक्तं।

स्वांते ततःपुनर्मूलदेवींमुद्रांतर्पणपूजनैः
अर्चयित्वाजपंकृत्वाततोविसर्जयेत्सुधीः
कालीतंत्रेपि एवंपूजाक्रमंकृत्वामूलेनैवय
थाविधि नैवेद्यादीन्यथाशक्त्यादद्याद्देव्यैःपु
नःपुनः ततोवैदशधावर्त्तदीपंदत्वाचसाध
कः पुष्पादिकंपुनर्दद्यान्मूलेनैवयथाविधि
कुमारीकल्पेपि ततोनीराजनंकुर्याद्दशवारं
प्रदीपकैरिति अष्टोत्तरेत्रिकोणंमंडलमालि
ख्यतिलरक्तपुष्पंतंडुलान्यानिपक्वौकृसमन्त्र
मंस्थाप्य ॐ ह्रूं ह्रीं श्रीं दक्षिणकालिकायैस्वाहा
एषबलिर्नमः इत्यनेनमंत्रेणसंसाध्यार्पयेत स
मांतेभोजनादौचबलिंदद्यान्महेश्वरि ततः
प्राणायामंकृत्वाकामकलांविभाव्यशिरसि
गुरुंध्यात्वाहृदिदेवींभावयन्मनसाष्टोत्तर
सहस्रंवरहस्यमालयासंतंदत्वाप्रजप्य पुनः
प्राणायामादिकृत्वार्घ्यजलंपुष्पादिकंगृही
त्वा गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंज
पम् सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्वरि
इत्यनेन तेजोमयंजपफलंदेव्याहस्तेसमर्प
येत् अथपरहस्यमालायथा तत्रकाली

पुपा॰
१॰
४५

मंत्रे दंतानमालयाचैव राजदंतेनमेरुणा प्र॰
जपेद्दिसर्थेः तस्यद्वादशपटलेपि दंतानमा
लिकाधानतपूर्वोस्याभूमिद्धुलेभा इतिप्रजप
दिसर्थेः अथवर्णमालायथा तदुक्तंविशुद्धे
श्वरमहातंत्रे मालाविधानंपरमंस्रणुपार्व
तितत्त्वतः येनविज्ञातमात्रेणमंत्राःसिद्ध्यं॰
तितत्क्षणात अनुलोमविलोमेनमंत्रवर्णं
विभेदतः मंत्रेणान्तरितान्सर्वान्वर्णान्तरि
तंमनुम कुर्यादर्णमयीमालांसर्वमंत्रप्रदी॰
पिनीम वरमार्णमेरुरूपंलंघनेनैवकारये
त पतमरमारहस्यमयोक्तंतेयशस्विनि त्व
याग्रमतंरकार्यंनान्येषंयस्यकस्यचित म
तांतरमुक्तंयामलेयथा सबिंदुवर्णमुबा
र्थपश्चान्मंत्रंजपेत्सुधीः तमेरुकंकल्पयि
त्वाजपेत्तत्रैवलंघयेत इति अथकरमाला
यथा बृहच्छ्रीक्रमसंहितायाम तर्जन्यग्रे
तथामध्येयोजपेत्सतुपापभाक अनामा
यास्तुपर्वद्वंतर्जनीमूलपर्वणि जपेद्दिसा॰
र्थः हेमपरमेश्वरेपि पर्वद्वयमनामायाः प
रिवर्जनेनकारयेत पर्वत्रयंमध्यमायास्तर्ज

सैकं समाविशेत् शक्तिमालां समाख्याता स
र्वमेत्र प्रदीपिका निमज्जनं करे कुर्यान्नतो·
काम्यं कदाचनेति स्वक्रमे तदुक्तं यामले
बलिपूजादिकं सर्वं निशायां क्रियते सदा त
त्र दृष्यतां यातिकालीविद्याप्रसादतः कु
लवृक्षमूले च रात्रौ पर्यटने चैव रात्रौ च शक्ति
पूजनम् न करोति कथं देव साधकः कौलि·
को भवेत् ततः काम्यबलिं दद्यात् तदुक्तं का
लिकापुराणे व्याघ्रं तु कामतो दद्यादात्मनो
देहशोणितम् नाभेरधस्ताद्रुधिरं हृष्टभाग
स्य च प्रिये स्वगात्ररुधिरं दद्यान्न कदाचिन्न
साधकः नोष्ठस्य चिबुकस्यापि नेन्द्रियाणां न
श्चैव च कण्ठाधो नाभितस्थोर्ध्वं हृद्गात्रस्य च पृ·
ष्ठतः पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेद
येत् तिलमुद्गप्रमाणं वा देव्यै दद्यात्तु भक्तितः
षण्मासाभ्यन्तरे तत्तत्काममिष्टमवाप्नुयात्
ततो देवीं वक्ष्यमाणस्तवेन स्तुत्वा प्रदक्षिणं वि
धायाष्टप्रणामं कुर्यात् तदुक्तं कालीतन्त्रे त·
तो वै शिरसा पृष्ठेन दत्त्वाष्टाङ्गप्रणामस्य चेति स्त्री
ष्यप्रदक्षिणं यथा प्रसार्य दक्षिणं हस्तं सव्यं न

पू.पा.
१.
४९
46

अशिरः पुनः दक्षिणां दर्शयेत्सार्द्धमनसापि च
दक्षिणाः त्रिधा च वेष्टयेत्सम्यक् कालिकायाः प्रद-
क्षिणाः सर्वप्रदक्षिणा ज्ञेयः सर्वदेवोद्यतः स्थितः
श्रेष्ठो नरः शतेन यस्तु कालिकायाः प्रदक्षिणाम्
सर्वान्कामानवाप्नोति पश्चान्मोक्षमवाप्नुया-
त् अष्टांगप्रणामो यथा दोर्भ्यां पद्भ्यामथ्या-
साभ्यामुरसा शिरसा दृशा मनसा वचसा चे-
ति प्रणामोष्टांग ईरितः अथ शक्तौ पंचांगप्र-
णामं कुर्याद्यथा बाहुभ्यां च सजानुभ्यां शिर-
सा वचसा धिया पंचांगकः प्रणामस्त्रविद्भिः
परिकीर्तितः अथ सामयिकैः सहपानादिकं
कुर्याद्यथा चक्राकारेण पंक्त्याकारेण वाभि-
न्नासनेन साधकैः सह शक्तिपुत्रकैः स्वगुरुक्रमक-
मेण पद्मासनेनोपविश्य सामयिके ललाटे च-
न्दनाक्ततं दत्वा शिवशक्तिबुद्ध्या पुष्पं च दद्यात्
ततो यदि गुरुस्तत्र तिष्ठति तदादौ गुरुं गंधपु-
ष्पादिना पूजयित्वा तस्मात्पात्रं शुद्धिसहितं तस्मै
समर्प्य प्रणमेत् गुरोरभावे तत्पात्रं जले निक्षि-
पेत् ततः शक्तिपात्रं शुद्धिसहितं शक्त्यै दत्वा
सामयिकेभ्योपि ज्येष्ठानुक्रमेण वीरपात्रा-

सरामृतं शुद्धिसद्दिं तत्पात्रं दद्यात् ततः सामयि
कोपि भक्त्या हस्तद्वयेन संगृह्य तदुपरि स्त्रिया
जन्मा पूर्ववदानंदभैरवभैरव्यौ संतर्प्य गुरु
देवतां तर्पयेत् ततः स्वकल्पोक्तविधिना ततः मयिकैः
स्वशुद्धिं कुर्यात् ततस्स्वं सहपात्रवंदनं कु
र्यात् यथा श्रीमद्भैरवशोविरप्रविलसद्बिंदा
मृतं सावितं तेनाथीश्वरयोगिनीमुनिगणैः
सिद्धैः समाराधितम् आनंदार्णवकं परात्
नमिदं साक्षात्त्रिखंडामृतं वंदे श्रीप्रथमं करं
भुजगातं पात्रविशुद्धिप्रदम् इत्यभिवंद्य वाम
हस्तेन पात्रमुत्तोल्य वंदनं कृत्वा गृहीतमि
होमोति गुरुशक्तिसाधकेभ्य आज्ञां गृह्णी
यात् तेचनुग्रहेति ब्रूयुः ततो मूलाधारात्कुं
डलिनीमिष्टदेवतास्वरूपामाजिह्वांतं विभा
व्य गुरुपादुकां स्मृत्वा शिवोहमिति विचिंत्य
हस्ताभ्यां पात्रं धृत्वा मूलमंत्रमुच्चरन् ऊंउत्ति
नीस्त्वेदं देवीं तर्पयेत् तदुक्तं हृदयाकारपद्मसा
म कृत्वा तन्मंत्रमंत्रेश्वरैकरूपदं देवीं कलांचि·
त्र्यंगीपञ्चामात्रवरं पलासवमतं दीपैर्धृतं
कज्जलैः पुष्पादिभिरभिमंत्रितं च निविडंस्समा

पृपा॰
१॰ हंनवासतांयेसंचिंत्यपिवंतिधान्तिखेलंतेयुग
४० क्तिंवसुक्तिंपराम् तेज्ञानेरेव सिंहरत्तिलकं
भालेपाणौच मदिरासम् कृत्वापिवेत्कुहं
ध्यायेत्तथादेवीचचिन्मयीम् इति ततश्चपा
त्रमाधारोपरिसंस्थाप्यवक्तेनक्रमेणापरा
मृतंगृहीत्वापात्रवंदनंकुर्यात्तथा हंसमीन
रसावहंदधितथा दंतवेपथ्यादिभिः किंचि
चंचलरक्तपंकजद्दृशान्तैस्संमावेदितम्
वामेस्थाउनरंविशुद्धिकरणंपाणौनिधायात्म
के वदेपात्रमहंद्वितीयमधुनानंदैकसंवर्धन
म् ततःश्रीवमात्रस्वीकृत्यामपात्रवंदनंकु
र्यात् सर्वाम्नायकलाकलापकलितंकौतू
हलोद्योतनेचदीपं हृत्कुशान्तशीतं वहन्तात्र स्पु॰
लादिभिःसेवितम् ध्यातंदेवगणैःपरंमुनि
गणैर्मोक्तार्थिभिःसर्वदा वंदेपात्रमहंतृतीय
मधुनाविज्ञानमोयत्तमम् मः मीनरसाव पुं॰
हंहरिहरब्रह्मादिभिःपूजितं द्रामेघुनयमि पु॰
कर्मनिरंतंतारासंतिक्राश्रयम् आचार्या
ष्टकसिद्धैभैरवकुलाधीशेनसंशोधितंपाय
संवमकारनवसंहितंपात्रंवंदेतुर्यमनुमः आ

यारेभुजगाधिराजवलयेपात्रंमहीमंडलं
द्रव्यंसप्तसमुद्रवारिपिशितंचाष्टौचदिग्द
न्तिनः सोहंभैरवमर्चयाम्यतिदिनंतारागणैर
क्षतैरादित्यप्रमुखैःसुरासुरगणैराज्ञाकरैः
सेवितम् इतिपंचमंपात्रम् ततोयावद्गृहा
दिकंतरलयतितावत्पानकंकार्यम् अथप्र
माणंयथा तदुक्तंरुद्रयामले साधकेभ्यःप्र
शक्तिभ्योदद्यात्कुर्मोत्स्यचंदनम् सामयिकैः
समंकुर्यादेविपानादिमंडलम् अन्यत्रापि
विस्मयचक्ररूपेणपंक्त्याकारेणवायथा
तदुक्तंकुलसारे नयनाग्निवाणसंख्याकार्या
तत्कुलसाधने हेतुपानंप्रकर्तव्यमिश्रकं
परमेश्वरि कृतेप्याधिकपानंतन्नकर्तव्यंच
साधकैः अथोत्तरतंत्रे अनुज्ञांपरतोल
ब्ध्वाग्रहणमीतिस्वयंवदेत् ज्येष्ठस्यानु
ज्ञातोगुरूणांवाकुलीनकैः गृह्णीयाच्चस्व
यसिद्धोपिदेव्यस्यासनःस्वधीः कुलार्णवे
पि एकासनोपविष्टायेभुंजतेचैकभाजने
एकपात्रेतथाद्वंद्वंतेयांतिनरकेधमे एक
पात्रेइतिसर्वैर्मिलित्वा एकस्मिन्पात्रेनपे

पृषा. २. ४८

48

यं न तु प्रतिवारं द्रव्यपानं न भिन्नं भिन्नं पात्रं का-
र्यम् । अनुष्ठानापतेः सम्प्रदायाविरोधात् स्व-
विना मंत्रेण पात्रपूजा विना मांसेन तर्पणम् ।
विना शाक्तावयमानं न तत्सर्वं निष्फलं भवेत् ।
स्वशक्तिं वीरशक्तिं वा दीक्षितां गुरुसग्रणीः ।
पाययित्वा पिबेद् द्रव्यमिति शास्त्रस्य निश्चयः ।
न पश्याच्च स्पृशेन्मात्रं न विंदुपाते यदयः । श-
क्तियुक्तो वसेद्वापि युग्मयुग्मविधानतः ।
शिवशक्तिधिया सर्वं चक्रमध्ये समर्चयेत् ।
अथ पात्रपरिमाणं यथा तंत्रे कुलसारे
नैकहस्तेन दातव्यं न मुद्रावर्जितं पिबेत् ।
नार्धशेषं करस्थेन न पिबेदेकपाणिना । अ-
ंगुष्ठं वंदनं कृत्वा पिबेत्तदमृतं पुनः । सव्ये-
नोद्धृत्य पात्रं तु मुद्रां कृत्वा पिबेत्सवामतः । विना
सांख्येन योगेन न कुर्याद्गुरुसंगतिम् । सा-
धारं नोद्धरेत्पात्रमाधारेषु विनिक्षिपेत् । पा-
त्रं न चालयेत्स्थानान्न कुर्यात्पानसंकरं । स-
शब्दं न पिबेद्द्रव्यं तथैव वचनं त्यजेत् । न स्थू-
लेन वस्त्रखंडेन पात्रं कुर्यात्सुनोरमम् । न छि-
द्रेन स्पृशेच्चक्रे कुलद्रव्याणि सुन्दरि वहिः

प्रत्यात्मवकारौ कुलद्रव्याणि दापयेत् नि
ष्ठीवनमथो वा गुं वक्रमध्ये विवर्जयेत् च
क्रमध्ये घटे भग्ने पात्रे च पतिते भुवि दीपना
शे च शंखसंस्थे श्रीचक्रं कारयेत्त्वथोः स्वा
पात्रस्थितं देवेन च न दद्याद् भैरवाय च दत्ते च
सिद्धिहानिः स्यात् क्रुद्धा भवति योगिनी परि
त्यक्तं प्रलापं च विनिंद्यां वक्रभाषणम् ऊर्ध्वा
सीनं मद्यं क्रोधं च क्रमध्ये विवर्जयेत् श्र
द्धाशमीरयेत्पात्रं न पात्रं पातयेद् यथः गुरु
शक्तिसमन्तानां च गुरूणां ज्येष्ठकनिष्ठयोः उ
च्छिष्टमत्तयेत्तेषां दद्यात्तस्माच्छिष्टमेव हि
दद्यात्तेभ्यो देवेभ्यः समवेदापदांपदम्
अन्यत्रापि शालतुच्छिष्टं पिबेन्मद्यं वीराः
च्छिष्टं तच्च वर्णम् शक्तिवीरप्रसादेन किं
न सिध्यति सुंदरि पीत्वा पीत्वा पुनः पीत्वा
पीत्वा पतति भूतले उत्थाय च पुनः पीत्वा
पुनर्जन्म न विद्यते ततः शांतिस्तोत्रं पठेत्
तदुक्तं यामले पीत्वा स्नाययिजनैर्देवि शां
तिस्तोत्रं पठेत्ततः न शांतं प्रेतकूष्मांडान
शंतं भूतकानराः साधकानां शिवाशांत

पूपा·
१·
४९
५१

स्वाम्नायपरिपाकिनाम् जयंतिमातरः सर्वा
जयंतियोगिनीगणाः जयंतिसिद्धडाकि
न्योजयंतिगुरुपंक्तयः जयंतिगुरुसद्भावा
जयंतिगुरवस्सदा जयंतिसाधकास्सर्वे
विशुद्धाःकौलिकाश्चये जयंतिसमयाचार
संपन्नाःपूजकानराः नंदंत्वणिमासिद्धा
नंदंतुकुलपालकाः इंद्राद्यादेवतास्संत
र्प्यंतुवास्तुदेवताः चंद्रसूर्यादयोदेवा
स्तुष्यंतुममभक्तितः नक्षत्राणिग्रहायो
गाःकरणाराशयश्चये सर्वेतेसुखिनोयां
तुसर्वेनद्यश्चपक्षिणः पशवस्तुरगाश्चैव
पर्वताःकंदरागुहाः ऋषयोब्राह्मणास्स
र्वेशांतिंकुर्वंतुमेसदा सुतामेविदिताः
संतुमित्रास्तिष्टंतुपूजकाः येयेपापर
ताःसुदुष्टाण्ययेमंदादर्शःस्वजनेदेवा
चारविसर्गेनष्टहृदयाभ्रष्टाश्चयेसाधकाः
दृष्ट्वाचक्रमध्येजातहृदयायेकौलिका
दुष्टकास्तेयांतुविनाशमत्रसमयेप्रीसे
शिवस्याज्ञया ततोयथाविधिशिवशक्ति
संयोगंकृत्वादेवोपदेशात्मानंसमर्पयेच्छ्री

पात्रमुद्रोल्लदेशाउपरिविन्यस्यामयित्वाग्रु
नःसंस्थाप्यसंहारमुद्रयादेवींस्वहृदिसमा
नीयश्रीदक्षिणेकालिकेपूजितासित्वंम
स्वइतिविसर्ज्जयेत्शामोधःस्थलिकांहृत्वाति
मौल्यवासिन्यैनमइतिविन्मंडलेसंपूजये
त देवताग्रेसमा[illegible]योगोदेवताप्रीणनंभ
वेत् संभोगान्तेपरंकृत्वादेवींहृदिसमान
येत् कर्मकृत्सोभवेन्मंत्रीनात्रकार्याविः
वारणा अथात्मसमर्पणमंत्रोयथा ॐइ
तः पूर्वप्राणबुद्धिदेहधर्माधिकारतोजा
ग्रत्स्वप्नसुषुप्त्यवस्थासुमनसावाचाकर्म
णापद्भ्यामुदरेणशिश्नायत्कृतंयदुक्तंय
त्स्मृतंतत्सर्वंब्रह्मार्पणंभवतुस्वाहा मांमदीयंश्री
दक्षिणकालिकाचरणेसमर्पणमस्तु
ॐतत्सदितिपठेत् अथकालीतंत्रेव वि
सर्ज्जनपरयामक्तासन्निधापनमुद्रया उ
द्वासयहृदयेदेवींतन्मयोभवतिध्रुवम् ७
रक्षणकालेतत्पूजावेषाप्रकीर्तिता। मे
रवंतंत्रेपि हृदयेचबहिर्देवींसमर्थ्यविधि
वत्सुधीः निर्माल्यंवैष्णवीदेशेनैवेद्यमतये

प्रणा॰
१॰ स्तुतः ततः सदामत्तेस्त्रिग्यमूर्मोमायावीजे
९॰ नकनिष्ठांगुलिनातिलकं कुर्यादनेन यंयं
स्पृशतिपादेन यं यं पश्यति वत्सवा सपूर्वद
सतां यातिय दिशाक्रसमो भवेत् नेतां यत्र
लेपं ब्रह्मरंध्रे युत्वा नैवेद्यं सर्वदेवाय सा
धकाय ब्रदहोशेषं स्वीकृत्य सोहमिति भा
वयन्वाहनतो वैस्वावाचारपराघोणेति स्व
गोयथास्थं विविहरेत् ततः कुलवृदम
णे शुभेस्थाने ब्रह्मरंध्रं यत्र लेपं तत्धारयेत्
नास्तिकेभ्यो न मूर्खेभ्यो न पशुभ्यो न गाढिने
कुलीनाय च दातव्यमथवा जलमध्यतः
ततः सोहमिति ध्यात्वा वैस्वावाचारतत्परः
हरिनाम्ना जातभावोभावो हि लिखितो वेष्टितः
वीरवद्विहरेदेकः सदासंगविवर्जितः या
मलेपि नैवेद्यं त्रिपुरादेव्या वांछितिविवुया
सुधे तस्मादेयं स्वरूपश्रेष्ठं वाल्लिणो वैस्वावे॰
कूर्मे॰ पिच शाक्राय सर्वोगाणेशाय यमाय च व गा॰
रुणायवरुणाणापि वायवे धनदाय च ईशा
नाय महादेवि साधकाय प्रदापयेत् तत्र
त्रिपुरापदस्वपलतणमिति अथ देवी वि

मज्जनानंतरं पानादिकं कार्यमिति तदुक्तं
ज्ञानार्णवे .... वीरभे
कांतकामिनः अमत्रापि पानं तु त्रिविधं
प्रोक्तं दिव्यवीरपशुक्रमैः दिव्यं देव्यग्रतः
पानं वीरं वीरासने स्थितम् तृतीयं तु पशोः
पानं पापकृल्लोकमोहकृत् उदयाकरपद्ध
मांच असंस्कृतं तु यत्पानं संस्कृतं भैरवः स्व
यम् चक्रपूजाविधौ शस्तं सर्वसिद्धिकरं शु
भम् असंस्कृतं पशोः पानं कलहोद्वेगका
रकम् संस्कृतं सिद्धिजनकं प्रायश्चित्तादि
शोधनम् मंत्राणां स्फुरणं तेन महापातक
नाशनम् आयुः श्रीकांतिसौभाग्यं ज्ञानं सं
स्कृतपानतः अष्टैश्वर्यं विवेचरं त्वं पतनं वि
वर्जनात् अस्य श्रीमहाकालभैरवमंत्र
स्य महाकालभैरव ऋषिः अनुष्टुप् छंदः
महाकालो देवता ह्रीं बीजं क्लीं शक्तिः स्वा
कीलकम् अथ मंत्रन्यासः ॐ ह्रीं ह्रीं ह्स्रीं
अंगुष्ठाभ्यां नमः ॐ हूं महाकालाय ह्रीं त
र्जनीभ्यां नमः महादेवाय क्लीं मध्यमाभ्यां
नमः कालिकायै अनामिकाभ्यां नमः ह्रीं

श्या० र० ५८

कनिष्ठिकाभ्यां नमः सर्वं मूलेन करतलपृ
ष्ठाभ्यां नमः एवमेव षडंगन्यासः अथ ध्या
नम् ॐ श्मशानस्थो महारुद्रो महाकालो
दिगंबरः कपालकर्त्तरीवामे शूलं खट्वांगं द
क्षिणे भुजंगभूषितांगोपि भस्मास्थिमाल
मंडितः ज्वलत्पावकमध्यस्थो भस्मशय्या
व्यवस्थितः विपरीतरतस्तत्र कालिकाहृ
दयोपरि एवं ध्यात्वा च वोढ्वा वतो कृत्वा च
परस्परम् अथ मूलमंत्रम् ॐ ह्रीं श्रीं ह्स्रीं
हूं महाकालाय ह्रैं महादेवाय क्रीं कालिका
यै ह्रीं इति श्रीपूर्णानंदपरमहंसविरचिते
श्यामारहस्ये समर्पणीयस्तृतीयः परिच्छेदः ३
अथ कालीकवचम् वीरभद्र उवाच ॐ का
लिकाकवचस्यास्य ऋषिर्भैरव उच्यते छं
दोनुष्टुप् समाख्याता देवी दक्षिणकालिका
शक्तिर्ह्रीं विशवीजानि विनियोगस्तु रक्षणे
शिरसि नयने भाले भ्रूयुग्मकर्णगंडके वदने
रदने जिह्वास्कंधदेशे गले च भुजद्वये म
हापार्श्वे पृष्ठे नाभौ च मेढ्रके कटियुग्मोदरे
पादे सर्वतो मंत्रवर्णकः गुणबीजयुगं मा

यात्वज्ञात्वा गुंश्चंचवाथनम गुणमायात्ववङ्किं
ववलभांतांकमादिह शास्त्रवादेमहाघो
रेकविंत्वशास्त्रसंग्रहे मंगलासर्वकार्येषु
स्तंभनेमोहनेतथा मारणेद्वेतथाका
र्येनिर्विघ्नोमेप्रजायते यदिवास्तुतनिग
देसभायांवादिदुर्गेमे शुद्धंतदितिज्ञानेन्व
सर्वग्रहरवलभे ॐमहाप्रेतासनायान्वशि
वांमेरक्षंतांसदा मरणेसमुत्करजांसुरु
मालासदावतु स्रभयंवरदेशेववाविघ्नोमु
द्रौवरक्षतु शवहृद्यंतथाकर्णेघोरदंष्ट्रा
सदावतु मुक्तकेशिक्रूरमामर्तनमविघ्नवि
नाशकः दक्षिणाकालिकापातुवंधुंसुत
विनाशिनी महाकालःसदापातुवीजम
षितमस्तकः इत्येवंकवचंयस्तुकालिका
याःपठेन्नरः मंत्रवित्सर्पिये ह्रीमान्सप्राप्नो
तिमनोगतिम भूर्जपत्रेस्ववर्णेवारजतेवा
थपत्रके लिखित्वाधारयेयस्तुयंत्रकुत्रापि
मंत्रयुक तस्यदर्शनमात्रेणवादिनोविला
यःसदा सर्वमनोगतंतस्यसिद्ध्यतेवनसं
शयः इतिश्रीकालिकाकवचंसमाप्तम्

पुपा॰
१॰
५२
52

श्रीभैरव उवाच ॐ सर्वं हि कथितं सर्वं कवचं
न प्रकाशितम् इदानीं प्रेमभावेन कथयस्व
ममाग्रतः श्रीभैरव उवाच कालिका कमला
काली कालरात्रिस्वरूपिणी मुण्डमाला देहरू
पा कवरी च प्रियावतु मम गात्राणि विश्वेशि:
कालिका श्यामा मनोहरी शिरो मे पातु वामसुं
उ कंठं पातु वृषध्वजा हृदयं पातु माहेशी
वैष्णवी नाभिमंडले नितंबं पातु रक्ताक्षी
मध्यं पातु रणप्रिया विशालाक्षी पातु गु
ह्यं ऊरुयुग्मं तथाम्बिका जानुयुग्मं मुण्डमा
ला गुल्फयुग्मं ललाटिका कमले शैलयु
गी च कामप्रथमपूजिता पादाग्रतोर्ध्वपा
दास्या करागतोर्ध्वदर्शनी तोर्ध्वरूपा च
तन्मूलं भीमा पातु तदंगुलीः करमूलं क
रालास्या कङ्कालकामा पातु रावतु मस्तिवं यं॰
नटाधारी कराग्रं शिवदा वतु करांशयुग्मं॰
लं पायात्सिद्धिधात्री सदाननाम् कामरूपा
वामपार्श्वं दक्षिणं मां सशोणेश्वरा अट्टहासा
वश्री वो मां सदा रत्नांबिकेश्वरी दक्षबाहु स्थ
लं पातु देवी विंध्यनिवासिनी कण्ठस्थानं

सोमराज्ञी मणिवंधे शिवावतु दक्षहस्ताग्रत
क्लंलंमूलाधारनिवासिनी ष्टंरक्तकोविं
दांकुंधररक्तहस्तिनी लोलजिह्वा दक्षनेत्रे
वामंरक्तमानन्दा दक्षश्रोत्रे सोमराज्ञी ना
मयुग्मभयंकरी ओष्ठ्यांहेमकर्णी दन्ता
न्रक्तनेत्रपुरी गंडेरक्तभोगांगी चिवुकेषु
रुधारिणी मरुदंडेललाटाद्वीनीवीरक्त
कालिका श्रामंनमेपात्तनिस्माजिह्वाग्रम
रूवत्सला चितंरक्तकोशांबीवचनंवा
रुम्प्रषणा वाचंरक्तसोत्कंटप्राणान्व
क्तसंयमी इदन्तुकालिकादेव्याःकवच
सर्वकामदम् प्रातःकालेशुचिर्भूत्वामध्या
न्हेवाशुचिस्मितः सन्ध्यायांवापठेन्मंत्री त
स्यराजावशोभवेत् मंत्रिणंवपुवर्गंचदा
सयेयोवरानने पठेद्वापाठयेद्यापिभक्तिपु
तः पठेन्नरधीः कवितांविपुलांलाभंवाग्मी
भवतिनान्यथा सविरायुःसर्वैश्वर्यश्रीसंजा
तेयःपठेन्सदा नचमायैर्नवमेदीनविका
दीजितेंद्रियः सर्वान्कामानवाप्नोतिकवच
स्यप्रसादतः इतिश्रीकालीकल्पेकालिका

श्या.
१०
२२

कवचममामम ॥ ॐकैलासशिखरारूढं
भैरवं चन्द्रशेखरम् वक्षःस्थलसमासीनं भैरवी
परिपृच्छति श्रीदेव्युवाच देवेशपरमेशानलो
कानुग्रहकारक ॥ कवचं सूचितं पूर्वं कथ्य-
यस्व मयि प्रभो यदि मे महती प्रीतिस्तवास्ति
कुलभैरव । कवचं कालिकादेव्याः कथय
स्वानुकम्पया श्रीभैरव उवाच अप्रकाश्य
मिदं देवि नरलोके विशेषतः लक्षवारं वा
रितापि स्त्रीस्वभावाद्धि पृच्छसि श्रीदेव्युवाच
सेवकाः बहवो नाथ कुलधर्मपरायणाः य
तस्ते समक्षं जीवाशाः शवोपरि चितोपरि ते
षां प्रयोगसिद्ध्यर्थं स्वरक्षार्थं विशेषतः ए
च्छामि वकृपया देव कथयस्व दयानिधे श्रीभै
रव उवाच कथयामि महाप्राज्ञे कालिकाक
वचं परम् गोपनीयं पशोरग्रे स्वयोनिरिव पा
र्वत्याः सर्वविद्यामहाराज्ञी कालिकाकाल
रूपिणी ॐ अस्य श्रीकालिकाकवचस्य
भैरव ऋषिः अनुष्टुप्छन्दः अद्वैतरूपिणी का
लिका देवता ह्रूं बीजं ह्रीं शक्तिः क्रीं कील
कम् ममसर्वकामार्थसाधने विनियोगः सरमंत्र

सिद्धयेविनियोगः सहस्रारेमहापद्मेकर्ष
रथवल्लोगुरुः वामोरुस्थितनन्दशक्तिः सदा
सर्वत्ररक्षतु परमाख्यः गुरुः पातुपरापरगु
रुस्तथा परमेष्ठीगुरुः पातुदिव्यसिद्धसमा
नवाः महादेवीसदापातुमहादेवस्तथाव
तु त्रिपुरोभैरवः पातुदिव्यरूपधरः सदा व
ल्लानंदः सदापातुसर्गदेवः सदावतु चेल
चितस्तथापातुवर्लेश्वलस्यपातुमाम् कु
मारः क्रोधनश्चैववरदः स्मरदीपनः माया
मायावतीचैवसिद्धेश्वराः पातुमांसदा विम
लः कुशलश्चैवभीमसेनः सुधाकरः मीना
गोरक्षकश्चैवभोजदेवः प्रजापतिः मूलदेवो
रतिदेवोविघ्नेश्वरहुताशनो संतोषः परमा
नंदः पातुमांमानवः सदा सर्वेषांनंदनाथां
नाश्चैताः परिकीर्तिताः गणनाथः सदापा
तुभैरवः पातुमांसदा वटुकोनः सदापातुउ
ग्रौमांपरिरक्षतु शिरसः पादपर्यंतंपातुमा
घोरदक्षिणा तथाशिरसिमांकालीहृदिमू
लेचरक्षतु संकर्णिविद्यादेवीसदासर्वत्र
क्षतु क्रींक्रींक्रींवदनेपातुहूंहूंचैवसदावतु

श्या. २. २८

ह्रीं ह्रीं पातु सदा घोरे दक्षिणे कालिके ऽवतु
क्रीं क्रीं क्रीं चण्डिका दिक्पूर्वे हूं हूं दले वामतोऽवतु
षडंगी युवती पातु षडंगे गुह्यदेव माम् यंत्र
राजः सदा पातु ऊर्ध्वाधो देवि रक्षतु चक्ररा
जः सदा पातु देवता परिपातु माम् उग्रा उ
ग्रप्रभा दीप्ता पातु पूर्वे त्रिकोणके नीला च
नावलाका च तथापरत्रिकोणके मात्रामु
द्रा मिता चैव तथा मध्यत्रिकोणके काली
कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ब
हिः षट्कोणगाः पान्तु विप्रचित्ता तथा प्रिये
सर्वाः श्यामाः खड्गधरा वामहस्तेन तर्जनी
ब्राह्मी पूर्वदले पातु नारायणी तथाग्निके
माहेश्वरी दक्षदले चामुण्डा रक्षतु कौ
मारी पश्चिमे पातु वायव्ये चापराजिता वारा
ही चोत्तरे पातु नारसिंही शिवेऽवतु ऐं क्रीं अ
सितांगः पूर्वे भैरवः परिरक्षतु ऐं ह्रीं रुरुश्चा
ग्निकोणे ऐं श्रीं मां चण्डस्तु दक्षिणे ऐं ह्रीं क्रोधो
नैरृत्यान्तु ऐं ह्रीं उन्मत्तकस्तथा पश्चिमे ऐं क्लीं
मां पातु कपाली वायुकोणके ऐं ह्रीं भीषण
नामा चोत्तरेऽवतु भैरवः ऐं ह्रीं संहार ऐशां मा

मातृणां मङ्गला: शिवा: ऐं हेतुवटुक: पूर्वेद
ले पातु सदैव माम् ऐं त्रिपुरान्तकवटुकश्चै
वाग्नेय्यां सर्वदावतु ऐं वह्निवेतालोऽपि
वटुको दक्षिणेऽवतु ऐं अग्निजिह्वो वटुरवा
न्नैर्ऋत्यां पश्चिमे तथा ऐं करालवटुक: पा
तु ऐं कपालवटुकस्तथा ऐं वायव्यां एकपादे
उत्तरे वटुकोऽवतु ऐं भीमवटुक: पातु ऐशां
दिशि मां सदा ऐं ह्रीं श्रीं फट् च स्वाहा चतुःषष्टि
मातर: सदा ऊर्ध्वाधो दशवामाद्या: ष्टदे
शे तु पातु माम् ऐं ह्रीं श्रीं फट् व्याघ्रमुखी
पूर्वे मां परिरक्षतु ऐं कां कां सर्पास्यमुखी अ
ग्निकोणे सदावतु ऐं मां मां मृगमेषमुखी
दक्षिणे मां सदावतु ऐं गं गं गजवाजिमु
खी नैर्ऋत्यां परिरक्षतु ऐं मं मं विडालमु
खी पश्चिमे पातु मां सदा ऐं वं वं क्रोष्टा
स्यमुखी वायुकोणे सदावतु ऐं ह्रूं ह्रूं मु
दीर्घमुखी लम्बोदर महोदरी पातु मामुत्त
रे ऐं ह्रीं ह्रीं शिवकोणके ह्रस्वजंघा ता
लजंघा प्रलम्बोष्ठी सदावतु एता: श्मशा
नगासिमा भीषणा विकृतानना: पातु मां स

कृपा.
२.
८४
55

सर्वदा देव्यास्तापकाश्रीष्टसर्विकाः इंद्रो मां
पूर्वतो रक्षेदाग्नेय्यामग्निदेवता दक्षेवामम
दा पातु नैर्ऋत्यां निर्ऋतिश्च माम् वरुणो मां
पातु नैऽपश्चान्मां वायमेवतु कुबेरश्चोत्त
रे पायादैशान्यां पातु सदाशिवः ऊर्ध्वं ब्रह्मा
सदा पातु अधश्चानंतदेवता पूर्वादिदिक्षु स्थि
तः पातु वज्राद्याश्च स्वायोगणाः कालिका
पातु शिरसि हृदये कालिकेवतु आधारे
कालिका पातु पादयोः कालिकावतु दिक्षु
मां कालिका पातु विदिक्षु कालिकावतु
ऊर्ध्वं मे कालिका पातु अधस्तात्कालिकावतु
चर्मासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि मेवतु
इंद्रियाणि मनश्चैव देहं सिद्धिं च मेवतु आ
काशमादपर्यंतं कालिका मे सदावतु वि
शंतिं कालिका पातु पथि मां पातु कालिका
शयने कालिका पातु सर्वकार्येषु कालिका
प्राणान्मे कालिका पातु दारान्मे पातु कालि
का पुत्रान्मे कालिका पातु धर्मं मे पातु का
लिका यत्र मे संशयाविद्या स्तत्र [illegible]तु शिवा
तया इतीदं कवचं देवि ब्रह्मलोकेपि दुर्लभम्

तव प्रीत्या मया ख्यातं गोपनीयं स्वयोनिवत्
तव नाम्नि श्रुते देवि सर्वयज्ञफलं लभेत् सर्व
पापं त्वयं याति वाञ्छा सर्वत्र सिद्ध्यति नाम्ना
शतगुणं स्तोत्रं ध्यानं तस्माच्छताधिकम्
तस्माच्छताधिकं मंत्रं कवचं तच्छताधिकम्
शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः
संस्थाप्य वामभागे तु शक्तिं स्वामिपरायणाम्
रक्तवर्णां समासीनां शिवमंत्रपरां शुभाम्
या शक्तिः सा महादेवी हररूपस्तु साधकः
शक्तिशुक्राद्यजे देवीं चक्रे वा मनसापि वा
भोगैस्तु मधुपर्काद्यैस्ताम्बूलाद्यैः स्रग्वास्त्र
तैः उद्दहृत्स्यपरं संपरं स्वस्यायनमहत्तु
सर्वयज्ञफलं तस्य भवेदेव न संशयः स
ग्रामेषु जयेच्छत्रून् गिरिषु भवतीव तस्य मातंगानिव केसरी
व्याधिः कदाचिन्न दुःखं नास्ति कदाचन ग
तिः सर्वत्र तस्य वायुस्तुल्यः सदा भवेत्
दीर्घायुः कामभोगी श्रीगुरुभक्तो भवेत्सदा
महालोकवचमाहात्म्यं पठमानस्य नित्यशः
विनापि योगवर्येण योगिनां समतां व्रजेत
मूर्जे तत्र विसमाप्तिमेवचकं तत्र विनिर्मितम्

श्या.
२.
५८

86

मध्ये त्रिकोणं संलिख्य साध्यसाधकयोर्लि
खेत् ३ठरेन्मूलमंत्रवर्णा[illegible] वर्णैर्नवेष्टयेत्
लक्षुमिश्रेण वंद्रेण चंदनाभ्यां च संहृदी [illegible] प
तं च ञं में हेशानिस्रगास्रस्रक्तलेमम् गो
रोचनाकुंकुमेन तत्राष्टकवं वलिखेत्
श्वेतसूत्रेण संवेष्ट्य लाक्षया परिमं उयेत्
पंचामृतैः पंचगव्यैः स्नापयित्वा शुभेऽहनि
संपूज्य देवतां रूपं गुटिकां सर्वकामदाम्
प्राणप्रतिष्ठां मंत्रेण प्राणं हृ विनियोजयेत्
अंतर्योनिं ततो ध्यात्वा तत्र संस्थापयेत्सुधः
पश्चात् गुटिकां दद्विकं ठलग्नां विलप्रदा
शीर्षवर्षपकरैर्द्विनाभौस्तंभनकारिणी
वहावामभुजे लेखावैरिपक्षक्षयंकरी ज
ठरे रोगदमनी पुत्रदा [illegible]दि स्थिता विद्या सं.
करी ललाटस्थापि शिखायां तु यशःप्रदा स
र्वकामप्रदा देवी सर्वरोगक्षयंकरी दक्षि
णे वा कुमूले पि यदि तिष्ठति सर्वदा तदा
सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते [illegible] एतस्य
व. कवचस्यै[illegible]पठनाद्धारणान्स्त्रिये सर्वान्का
मानवाप्नोति तत्र वक्ष्ये हाताप्रकाशितम् ॥

रोः पादप्रसादेन सिद्धिं यो लभते यदि तथापि
कवचं देवि त्रिषु लोकेषु दुर्लभम् स च देवो
हरः साक्षान्मम सत्त्वी परमेश्वरी यस्य भक्तिर्गु
रोर्नित्यं वर्त्तते देव वत्प्रिये तदा मंत्रस्य यत्र
स्य सिद्धिर्भवति नान्यथा कवचस्य तथा
सिद्धिर्घुटिकायाश्च सुंदरि अज्ञात्वा कव
चं देवि न ज्ञायते फलदा तु कामम् इह लोके दुः
खी भूत्वा परे च नरकं व्रजेत् संसंसंसंपुनः
संसंससंसंपुनः पुनः न शक्तोऽपि प्रभाव
तः कवचस्यास्य वर्णितुम् यस्मै कस्मै न दा
तव्यं कवचं शंभुदुर्लभम् न देयं परशिष्ये
भ्यः कृपणेभ्यश्च सुंदरि शिष्याय भक्तियु
३ नाय ... वकाय तथैव च गुरुभक्तिविही
नाय परदाररताय च निंदकाय कुशीला
य दांभिकाय च सुंदरि यो ददाति निषिद्धे
भ्यः कवचं मन्त्रवादिनम् चत्वारि तस्य न
श्यन्ति आयुर्विद्या यशो बलम् देयं शिष्याय
शान्ताय गुरुभक्तिरताय च सर्वलक्षणसं
य युक्ताय नित्यं मंत्ररताय च इति श्रीरुद्रयामले
तंत्रे उत्तरतंत्रे कालीप्रस्तावे कालभैरवसंवा

पृष्ठ॰ दक्षिणाकालिकाकवचंसमाप्तम् ॥
२॰ अथत्रिरूपास्तोक्तकवचम् ॐनमामिगुरु
१० मातेऽभयमंत्रशक्तिसमन्वितम् प्रसन्नंज्ञा
57 नविज्ञानहेतुं बुद्धिप्रकाशकम् गजेंद्रव
दनंमौलिरत्नंविघ्नविदारकम् पाशांकु
शवराभीतिलसद्भुजचतुष्टयम् भैरवः
सर्वदापातुऋषिर्मेशिरसोपरि सुविंद
दःसदापातुत्रिष्टुप्छंदविजयात्मकम् गु
णत्रयमयीशक्तिःपरशक्तिस्तुरीयका
ब्रह्मस्वरूपिणीपातुहृदयेममकालिका
बीजस्वरूपिणीपातुंह्रींकारीशक्तिरूपि
णी हूंशक्तिःसर्वदापातुसर्वरक्षास्वरूपि
णी महाकालःसदापातुमहाभीमपराक्र
मः ददातुममकामानिसर्वसिद्धीश्वरो
विभुः आदित्यकारपर्यंताहृदयेममंमा
तृका एवंतुआदिक्षांताचरंतुवाङ्मय
मके अममध्यगतावर्णास्मादिक्षांतान
येवच सर्विंदवःसदापांतुजंघयोरुभ
योर्मम भूतप्रेतपिशाचाद्याविघ्नदेवत
याश्चनः दुष्टभावाःसमस्याश्चवर्णारंतु

मां सदा सर्वरोमकूपेषु मर्मस्थानेषु
संधिषु नाडीधातुविकारेषु रक्षतु मम मा
तृकाः शक्तिराधाररूपा पातु मां मेढ्रमे
द्वयं वतु श्रीमन्मा[illegible] सदा पातु सर्वदेवमयः स्वा
यम्भू कणगतो बलिः पातु सद्गुरुः पातु मां
सदा रत्नद्वीपः सदा पातु रक्षतु कल्पपाद
पः श्मशानपीठकः पातु पातु मां मणिवे
दिका सदाशिवो महाप्रेतासनो मां परिर
क्षतु द्वारदेशो द्वारपालो योगिन्यः पान्तु मां
सदा सिद्धयोष्टौ सदा पान्तु सर्वादिवस्त्रदिग्ग
ताः कालीकपालिनीकुल्लाकुरुकुल्लातथै
वच विरोधिनी विप्रचित्ता नमामि सर्वसिद्धये
पतान्तु सर्वयोगिन्यो बहिः षट्कोणके स्थि
ताः रक्षन्तु मां सदा देव्यो मातरो मन्त्रवत्सलाः
उग्रामुग्रप्रभां दीप्तां नमाम्यहं विमूतये
सर्वसिद्धिं प्रयच्छन्तु पान्तु मां पुत्रवत्सदा
नीलां घनां बलाकां च प्रणमामि समन्तत
कः सर्वविघ्नान्संछिन्नाय रक्षन्तु कल्म
षाणि गात्रतु मात्रामुद्रामितानां च नमामि
वरणां तु जन्म देवीप्रियसखीनां च शरणं

श्या॰
२॰
५८
58

कामसिद्धये पत्राः पंचदशकोणेषु केका
वरदाभयदा तर्जनेन वामहस्तेन वक्त्रं दक्षिण
संयुता मुंडमालाधराशीर्षे नीलांजनच·
योपमा शत्रुहानिप्रदा षट्कोणपातु मां का।
लिकाप्रिया बहिः पद्मदलांतेतु ब्रह्माण्या
द्यष्टसिद्धयः रक्षंतु मे प्रयच्छंतु सिद्धिं देव्यो
दयान्विताः ब्रह्माणी पातु मां पूर्वे सर्वाशाप्र
वरप्रदा वह्नौ नारायणी पातु सर्वकामा
र्थसिद्धिदा माहेश्वरी दक्षिणे पातु सर्वमंगल
कारिणी चामुंडा नैर्ऋते पातु शत्रुशत्रुप्र
मर्दिनी कौमारी पश्चिमे पातु शक्तिहस्ता
विमर्दिनी अपराजिता च वायव्यां पातु मा
जयदा शुभा उत्तरे पातु वाराही वरदा घोर
भाषिणी नारसिंही सदा पातु पश्चात्स्मा
भयनाशिनी एतास्तु परविद्यायाः श्यामाय
श्चाष्टदेवताः ब्रह्मविष्णुशिवादीनां तेजः
पुंजोद्भवां परां सूर्येंदुवह्निपीठे त्वेवं देवी
परमेश्वरीम् नमामि दक्षिणां मातः का
लिके परमेश्वरि भिन्नांजनचयप्रख्यां प्र
वीणशवसंस्थिताम् गलच्छोणितधारा

भिः स्मेराननसरोरुहाम् पीनोन्नतकुच
द्वंद्वां पीनवक्षोनितंबिनीम् दक्षिणाम्बु
क्तकेशालीं दिगंबरविनोदिनीम् महाका
लशिवाविष्टांस्मेराननेंदोपरिस्थिताम्
स्रवखंडस्मितामोदमोदिनीमदविकलाम्
श्रारक्तस्रवखंडाद्राभिर्नेत्रालीभिर्विराजि
ताम् शवहृद्यकृतोत्तंसां सिंदूरतिलको
ज्ज्वलाम् पंचाशन्मुंडघटितमालांलोहि
तलोचनाम् नानामणिविशोभाढ्यांना
नालंकारभूषिताम् शवास्थिकृतकेयू
रशंखकंकणमंडिताम् शववत्ससमा
रटंतां लेलिहानां शवं कचित् शवमांस
कृतग्रासांसाट्टहासांमुहुर्मुहुः खड्गमुं
डधरांवामेसव्येभयवरप्रदाम् दंतुरांच
महारौद्रीं चंडनादातिभीषणाम् शिवा
भिर्घोररूपाभिर्वेष्टितांमयदर्शिनीम्
माभैर्माभैःस्वभक्तेषु जल्पंतीं घोरनिः कृ
कृ स्वनैः एवं किं [illegible]थाकिं [illegible]यद्दामीति
प्रभाषिणी त्वंगतिः शरणंदेविविंबमाना

पुपा॰
२॰
५९ परमेश्वरी पाहिमांकरुणासांद्रेनमस्ते
परमेश्वरि नमस्तेकालिकेदेविनमो
स्तुभक्तवत्सले सर्वितांहरमेदेविप्र
तिभाजनयदेश्विके गद्यपद्यमयीवा
णीतर्कव्याकरणादिकाम् अनधी
तगतांविद्यांदेहिदक्षिणकालिके
जयंदेहिसभामध्ये धनंदेहि
धनागमे देहिमेचिरजीवित्वंकालि
केरुद्रदक्षिणे राज्यंदेहियशोदेहि
नूपुत्रान्दारान्धनंतथा देहांतेदेहिमे
मुक्तिंजगन्मातर्नमोस्तुते मंगला
भैरवीदुर्गाकालिकात्रिदशेश्वरी
उमाहैमवतीकन्याकल्याणीभैरवी
श्वरी कालीब्राह्मीचमाहेशीकौमा
रीमधुसूदनी वाराहीवामलीच
एडीजगुर्वैभुनयःसदा उग्रतारेति
तारेतिशिवेत्येकजटेतिच लोको
त्तरेतिकालीतिगीयंतेकृतिभिःसा

दा यथाकालीतथातारातथा
छिन्नावऊलका एकमूर्तिश्च
त्रैमेदादेवित्वकालिकापरा
एकद्वित्रिविधादेविकोटिधानं
तरूपिणी श्रंग्यगकेनभिर्मदेः
कालिकेतिप्रगीयते शंभुः
पंचमुखेनैवगणात्वक्कंनते
त्वमः वामुखेनतत्कृतं स
र्वतमस्त्ववरदाभव प्रा
णान्तदयशोरत्नपुत्रदारां
स्वरदेमे—

प्रया.
२.
८.
60

सर्वकाले सर्वदेशे पाहि द
क्षिण कालिके यः सम्पूज्य
पठेद्विद्वां दिवा वा सन्ध्ययो
स्तथा अवाप्य महतीं प्रज्ञां
सर्वकामांस्ततो लभेत् ॥

इति श्री विरूपाक्षविर
चिते श्री कालिका
कवचं समा
प्तम् ॥

तथाच भैरवतन्त्रोक्तकवचम् ॥ श्रीभैरवु
वाच कालीपूजाश्रुता नाथ भगवन् विवि
धाः प्रभो इदानीं श्रोतुमिच्छामि कवचं पूर्व
सूचितम् त्वमेव कारणं नाथ त्राहि मां दुःख
संकटात् सर्वदुःखप्रशमनं सर्वपापप्रणाश
नम् सर्वसिद्धिप्रदं पुण्यं कवचं परमाद्भुतम्
यतो वै श्रोतुमिच्छामि वद मे करुणानिधे
श्रीभैरवउवाच रहस्यं शृणु वक्ष्यामि भैरवि
प्राणवल्लभे श्रीजगन्मङ्गलं नाम कवचं
मन्त्रविग्रहम् पठित्वा धारयित्वा च त्रैलोक्यं
मोहयेत्क्षणात् नारायणोपि यद्धृत्वा नारी
भूत्वा महेश्वरम् योगिनं क्षोभमनयद्यद्धृ
त्वा च रघूद्वहः वरदृप्तान् जघानैव रावणादि
निशाचरान् यस्य प्रसादादीशोपि त्रैलोक्य
विजयी प्रभुः धनाधिपः कुबेरोपि सुरेशो
भूच्छचीपतिः एवं च सकला देवाः सर्वसिद्धी
श्वराः प्रिये श्रीजगन्मङ्गलस्यास्य कवचस्य पृदे॰
ऋषिः शिवः छन्दोनुष्टुब् देवता च कालिका द
क्षिणेरिता जगतां मोहने दुष्टविजये भुक्तिमु
क्तिषु योषिदाकर्षणे चैव विनियोगः प्रकीर्त्ति

श्या.
२.

नः ॐ शिरो मे कालिका पातु क्रींकारैकाक्षरी
परा क्रीं क्रीं क्रीं मे ललाटं च कालिका खड्गधा
रिणी हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम
दक्षिणे कालिके पातु घ्राणयुग्मं महेश्वरी
क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकम्
सकलं वदनं पातु ह्रीं ह्रीं स्वाहा स्वरूपिणी
द्वाविंशत्यक्षरी स्कन्धौ महाविद्याखिलप्रदा
खड्गमुण्डधरा काली सर्वांगमभितोऽवतु क्रीं
हूं ह्रीं त्र्यक्षरी पातु चामुण्डा हृदयं मम ऐं हूं
ॐ ऐं स्तनद्वन्द्वं ह्रीं फट् स्वाहा ककुत्स्थलं अष्टा
क्षरी महाविद्या भुजौ पातु सकर्तृका क्रीं
क्रीं हूं हूं ह्रीं ह्रीं करौ पातु षडक्षरी मम क्रीं
नाभिं मध्यदेशं च दक्षिणे कालिकेऽवतु
क्रीं क्रीं स्वाहा पातु कंठं कालिका सा दशाक्षरी
क्रीं ह्रीं दक्षिणे कालिके हूं हूं पातु कटिद्वयं का
ली दशाक्षरी विद्या स्वाहान्ता चोरुयुग्मकं ॐ
ह्रीं हूं स्वाहा मे पातु जानुनी कालिका सदा का
ली हृन्नामविद्येयं चतुर्वर्गफलप्रदा क्रीं हूं
ह्रीं पातु सा गुल्फं दक्षिणे कालिकेऽवतु क्रीं
हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरी मम ख

हूं मुंडधरा काली वराभयधारिणी विद्याभिः
सकलाभिः सा सर्वांगमभितोवतु कालीक-
पालिनी कुल्ला कुरुकुल्ला विरोधिनी विप्रचि-
त्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः नीलाघ-
नावलाका च मात्रा मुद्रामिता च मां एताः स-
र्वाः खड्गकरा मुंडमालाविभूषणाः रक्षंतु
स्वायुधैर्दिक्षु ब्राह्मी नारायणी तथा माहे-
श्वरी च चामुंडा कौमारी चापराजिता वाराही
नारसिंही च सर्वाश्चामितभूषणाः रक्षंतु स्वा-
युधैर्दिक्षु मां विदिक्षु यथा तथा इति ते क-
थितं दिव्यं कवचं परमाद्भुतम् श्रीजगन्मं-
गलं नाम महामन्त्रौघविग्रहम् त्रैलोक्या-
कर्षणं ब्रह्मकवचं मन्मुखोदितम् गुरुपू-
जां विधायाथ विधिवत्प्रपठेन्नरः कवचं
त्रिः सकृद्वापि यावज्ज्ञानं च वा पुनः एतच्छ-
तार्धमावृत्य त्रैलोक्यविजयी भवेत् त्रैलोक्यं
क्षोभयत्येव कवचस्य प्रसादतः महाकवि-
र्भवेन्मासात्सर्वसिद्धीश्वरो भवेत् पुष्पांज-
लिं कालिकायै मूलेनैव पठेत्सकृत् शतव-
र्षसहस्राणां पूजायाः फलमाप्नुयात् भूर्जे

पृ.पा. २.

२०/तू.२

विलिखितं चैतत्स्वर्णस्थं धारयेद्यदि शिखा
यां दक्षिणे वा हस्ते कण्ठे वाथ धारयेद्बुधः त्रैलो
क्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात्
पुत्रवान्धनवांश्श्रीमान्नानाविद्यानिधिर्भवेत्
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः
नाशमायान्ति सर्वत्र कवचस्यास्य कीर्तनात्
मृतवत्सा च या नारी वन्ध्या वा मृतपुत्रिणी कं
ठे वा वामबाहौ वा कवचस्यास्य धारणात्
बहुपत्या जीववत्सा भवत्येव न संशयः न
देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः शि
ष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमाप्नुया
त् स्पर्धामुद्धूय कमला वाग्देवी मन्दिरे मुखे
पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितम्
इदं कवचमज्ञात्वा यो जपेत्कालि[illegible]म् कामनु
शतलक्षं प्रजप्तापि तस्य विद्या न सिद्ध्यति स
शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात्
जपेद्दाद्रोजपेद्दैतैस्समवाराणपञ्चकमात् ३
हृस्मयत्र कृत्वापि गोपनीयं प्रयत्नतः लि
खित्वा स्वर्णपत्रे वै पूजाकाले तु साधकैः
मूर्ध्नि धार्यं प्रयत्नेन विद्यारत्नं प्रपूजयेत् ३

इति श्रीभैरवीतन्त्रे कालीकल्पे कालीकवचं स
माप्तम् ॥ ॥ ॥

अथ कालीसहस्रनाम एतस्मिन्नेव काले
तु भृगुरामस्य पार्वती कार्तवीर्यसुतास्
वै पितरं जघ्नु तत्क्षणात् तच्छ्रुत्वा रेणुका वा
क्यं जमदग्नेर्विनाशनम् चुकोप भृगुरामस्तु
कालान्तकयमोपमम् स्कंदे परशुमादाय
अतीवसुमनोहरम् पितुःशापाग्नितं कृत्वा
वध्याम जगतीतले ततः कैलासमगमद्रामः
परशुनामसह तदृष्ट्वा साधकश्रेष्ठं शिवो वच
नमब्रवीत् आगतोसि किमर्थं त्वं कथयामा
सतत्वतः तस्य तद्वचनं श्रुत्वा रोषात्स्फुरि
तलोचनम् कथयामास तां सर्वां पितुःशा
पार्जितां क्रियाम् तदा मनसि संकाय कालि
कां कालनाशिनीं भृगुरामाय तां विद्यां दद
दौ तस्मिन्सदाशिवः कथयामास कवचं त
त्रिपंतकरं शुभम् यदा नामसहस्रं सः क
थयामास तत्वतः यत्काल्याश्च पुरा प्रोक्तं।
स्वयं नामसहस्रकम् तत्सर्वं भृगुरामायक
थयामास शंकरः आराध्य दक्षिणां कालीमा

पुपा॰
२० मःपरशुनामहं पितुःशोकान्नदादेविनिःक्ष॰
श्रावकोपात्मम् त्रिसप्तकृत्वाःकुपितोनिःक्ष
म॰ त्रान्करोत्महीम् एवंतंपञ्चकेचकेशोणि
20/3 तोदकैस्ततः रक्तैर्मासैस्तदाकालीतर्पया
मासतन्ततः तदाभवत्संतुष्टादेवीदानव
नाशिनी शिवउवाच कथितोयंमहामंत्रः
सर्वमंत्रोत्तमोत्तमः यामाराध्यमयाप्राप्ता।
मैश्वर्यपदमुत्तमम् संयुक्तःपरयाभक्त्या
यथोक्तविधिनाभवान् कुरुतामर्चनंदेव्या
स्त्रैलोक्यविजिगीषया श्रीरामउवाच प्र
सन्नोयदिमेदेवपरमेशपुरातन रहस्यं
परयादेव्याःकृपयाकथयप्रभोः विना
वैंनविनाहोमंविनान्यासंविनाबलिम् वि
नागंधंविनापुष्पंविनानित्योदितांक्रियाम्
प्राणायामंविनाध्यानंविनाभूतविशोधनम्
विनाजपंविनादानंयथाकालीप्रसीदति ।
श्रीशिवउवाच ०० त्वयोक्तमप्राज्ञरघुवं
शसमुद्भव भक्तानामधिभक्तोसित्वमेव
साधयिष्यसि देवीदानवकोटिघ्नीलील
याहयिरप्रियाम् सदास्तोत्रप्रियामुग्रा

कामकौतुकलालसाम् सर्वदानंदहृदयां सा
सदासक्तमानसीम् माध्वीकमत्तसंमोहान्तुः
रागिणीं विह्वलां दीपराम् श्मशानवासिनीं प्र
नगणानन्दमहोत्सवाम् योगप्रभां योगिनी
शीर्षां योगीन्द्रहृदयस्थिताम् तामुग्रकालिकां
नाम प्रसादयितुमर्हसि तस्याः स्तोत्रं महापु
ण्यं स्वयं कालप्रकाशितम् तवतत्कथयि
ष्यामि श्रुत्वा वत्सावधारय गोपनीयं प्रयत्ने
न पठनीयं परात्परम् यस्यैककालपठना
त्सर्वे विघ्नाः समाकुलाः नश्यन्ति दहने दीप
पतंगा इव सर्वतः निघ्नीष्ठेष्ठक्रकेशास्तनः
ग्रशक्तिसमन्वितः मनसा चिंतयेत्कालीं म
हाकालेन लालिताम् पठेन्नामसहस्राख्यं
दा० स्तोत्रं मोक्षस्य साधनम् प्रसन्ना कालिका त
स्य पुत्रत्वेनानुकंपते यथा ब्रह्मामृतै ब्रह्मा
ऊसैमैः पूजितः ११ प्रसीदति तथा तेन सदा
काली प्रसीदति अस्य श्रीदक्षिणकालिका
स्तोत्रस्य महाकालभैरवऋषिः अनुष्टुप्छं
दः श्मशानकालिकादेवता श्रीधर्मार्थका
ममोक्षार्थे जपपाठे विनियोगः ॐ नमः काले

पुण॰
२॰

4

कामभगवस्यै ॐ श्मशानकालिका काली भद्र
काली कपालिनी गुह्यकाली महाकाली कु
रुकुल्ला विरोधिनी कालिका कालरात्रिश्च म
हाकालनितंबिनी कालभैरवनामा च कुल
धर्मप्रकाशिनी कामदा कामिनी काम्या क
मनीयस्वभाविनी कस्तूरीरसलोलाढ्या कुञ्ज
रेश्वरगामिनी ककारवर्णसर्वांगी काकिनी
कामसुन्दरी कामार्ता कामरूपा च कामधेनुः
कलावती कांता कालस्वरूपा च कामाख्या
कामपालिनी कुलीना कुलवंसृवा दुर्गा दुर्ग
तिनाशिनी कौमारी कुलजा कृष्णा कृष्णदे
हा कृशोदरी कृशांगी कुलिशांगी च क्रींकारी
कमला कला करालास्या कराली च कुलकां
तापराजिता उग्रोग्रप्रभा दीप्ता विप्रचित्ता म
हाबला नीला घना महानादा महामुद्रा मिता
मिता ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्स
ला माहेश्वरी च चामुण्डा वाराही नारसिंहिका
वज्रांगी वज्रकंकाली नृमुण्डस्रग्विणी शिवा
मालिनी नरमुण्डाली गलद्रक्तविभूषणा
रक्तचंदनसिक्तांगी सिंदूरारुणमस्तका

पूं॰

घोररूपा घोरदंष्ट्रा घोरा घोरतरा तथा महादं
ष्ट्रा महामाया सुदती युगदंतुरा सुलोचना
विरूपाक्षी विशालाक्षी त्रिलोचना शारदें
दुप्रसन्नास्या स्फुरत्स्मेरांबुजेक्षणा अट्टहा
सा प्रसन्नास्या स्मेरवक्त्रा सुभाषिणी प्रसन्न
ना॰ पद्मवदना स्मितास्या प्रियभाषिणी कोटराक्षी
कुलश्रेष्ठा महती बहुभाषिणी सुमतिः कु
मतिश्चण्डा चण्डमुण्डातिवेगिनी प्रचण्डा चण्डि
का चण्डी चर्चिका चण्डवेगिनी सुकेशी मुक्त
केशी च दीर्घकेशी महाकचा प्रेतदेहकर्ण
पूरा प्रेतपाणि सुमेखला प्रेतासना प्रियप्रेता
प्रेतभूमिकृतालया श्मशानवासिनी पुण्या
पुण्यदा कुलमंडिता पुण्यालया पुण्यदेहा
पुण्यश्लोका यशस्विनी पूता पवित्रा परमा
परा पुण्यविभूषणा पुण्यनाम्नी भीतिहरी
वरदा खड्गपालिनी नृमुण्डहस्तसब्बस्वा
च्छिन्नमस्ता सुनासिका दक्षिणा श्यामला श्या ना॰
मा शान्ता पीनोन्नतस्तनी दिगम्बरा घोररवा
ना॰ सृक्कान्ता रक्तवाहिनी घोररावा शिवासंगा
विसंगा मदनातुरा महाप्रसन्ना प्रमदासु

पुण॰
२॰

6

यासिंधुनिवासिनी श्रुतिमन्त्रामहामन्त्रासर्वा
कर्षणकारिणी गीतप्रियावाद्यरताप्रेतान
स्थपरायणा चन्द्रभुजाद्दशभुजाअष्टादशभु
जातथा कात्यायनीजगन्माताजगतीपरमे
श्वरी जगद्बंधुर्जगद्धात्रीजगदानंदकारिणी
जगज्जीवमयीहैमवतीमायामहामयी ना
गयज्ञोपवीतांगीनागिनीनागशायिनी ना
गकन्यादेवकन्यागांधारीकिन्नरेश्वरी मोह
रात्रिर्महारात्रिर्दारुणीभास्वरासुरी विद्याध
रीवसुमतीयक्षिणीयोगिनीजराराक्षसी
डाकिनीवेदमयीवेदविभूषणा श्रुतिःस्मृ
तिर्महाविद्यागुह्यविद्यापुरातनी चिंत्याचिं
त्यस्वधास्वाहानिद्रातंद्राचपार्वती अपर्णा
निश्चलालोलासर्वविद्यातपस्विनी गंगाका
शीशचीसीतासतीसत्यपरायणा नीतिःसु
नीतिःसुरुचिस्तुष्टिःपुष्टिर्धृतिःक्षमा वाणी॰
बुद्धिर्महालक्ष्मीर्लक्ष्मीर्नीलसरस्वती स्रोत
स्वतीसरस्वतीमातंगीविजयाजया नदी॰
सिंधुःसर्वमयीताराश्मशाननिवासिनी शुद्धात
रंगिणीमेधालाकिनीबहुरूपिणी स्थूलासू

स्मासूक्ष्मतराभगवत्स्वरूपिणी परमाणु।
स्वरूपा च चिदानंदस्वरूपिणी सत्यानंदस
यी सत्या सर्वानंदस्वरूपिणी सुनंदा नंदि
नी स्तुत्या स्तवनीयस्वरूपिणी रंकिणी टंकि
नी चित्रा विचित्रा चित्रभूषणा पद्मा पद्माल
या पद्ममुखी पद्मविभूषणा डाकिनी शा
किनी शांता राकिनी रुधिरप्रिया भ्रांतिर्भ
वानी रुद्राणी मृडानी शत्रुमर्दिनी उपेंद्रा
णी महेशानी ज्योत्स्ना चंद्रस्वरूपिणी सूर्या
त्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिपुमान् श
क्तिः सूक्तिर्मतिमती भक्तिर्मुक्तिः पतिव्रता स
र्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा सर्वज्ञा
सिद्धिदा सिद्धा भव्या भव्या भयापहा कर्त्री ह
र्त्री पालयित्री शर्वरी तामसी दया तमिस्रा
तामसी स्थाणुः स्थिरा धीरा तपस्विनी चार्व
गी चंचला लोलजिह्वा चारुचरित्रिणी त्रपा
त्रपावती लज्जा विलज्जा ह्रीरजोवती सरस्व
ती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी गरिष्ठा
दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा भीमा भ
यानका भीमनादिनी भीः प्रभावती वागीश्व

पुपा॰
१॰ ह्रीं श्रीं धूम्रनायज्ञकर्त्री यज्ञप्रिया ऋक्सामा
थर्वनिलया रागिनी शोभनस्वरा कालक-
ण्ठी कंबुकण्ठी वेणुवीणापरायणा वंशिनी
वैष्णवी स्वच्छा धरित्री जगदीश्वरी मधुमती
कुण्डलिनी ऋद्धिः सिद्धिः शुचिस्मिता रंभोर्व-
शी रती रामा रोहिणी रेवती मघा शंखिनी
चक्रिणी कृष्णा गदिनी पद्मिनी तथा शूलि-
नी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी पि-
नाकधारिणी धूम्रा शरभी वनमालिनी रथि-
नी समरप्रीता वेगिनी रणपण्डिता जटिनी
वज्रिणी नीला लावण्याम्बुधिचन्द्रिका बलि- पि॰
प्रिया सदापूज्या पूर्णा दैत्येन्द्रमर्दिनी महिषा-
सुरसंहर्त्री वशिनी रक्तदन्तिका रक्तपा रुधि-
राक्ताङ्गी रक्तखर्पर हस्तिनी रक्तप्रिया
मांसरुचिरासवासक्तमानसा गलच्छोणि-
तमुण्डाली कण्ठमालाविभूषणा शवासना
चितान्तस्था महेशी वृषवाहिनी व्याघ्रत्व-
लिनी॰ ग्वरा चीनचेलिनी सिंहवाहिनी वामदेवी
महादेवी गौरी सर्वज्ञा भाविनी बालिका त-
रुणी वृद्धा वृद्धमाता जरातुरा ॥ ॥

स्वभूर्विलासिनी ब्रह्मवादिनी ब्रह्मणी मही
स्वप्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी अ
मोघारुंधती तीव्रा भोगवत्यनुरागिनी मं
दाकिनी मंदहासा ज्वालामुख्यसुरांतका
मानदा मानिनी मान्या माननीया मदोद्धता
मदिरा मेदुरोन्मादा मेध्या साध्या प्रमोदिनी
सुमेध्यानंतगुणिनी सर्वलोकोत्तमोत्तमा
जयदा जित्वरा जैत्री जयश्रीर्जयशालिनी
सुभदा स्वरदा सत्या सदासंक्षोभकारिणी
शिवाहूती भीतिमती विभूतिर्भीषणानना
कौमारी कुलजा कुंती कुलस्त्री कुलपालिका
कीर्तिर्यशस्विनी भूषा भूष्या भूतपतिप्रिया
सगुणा निर्गुणा दृष्टा निष्टा काष्ठा प्रतिष्ठिता
धनिष्ठा धनदा धान्या वसुधा स्वप्रकाशिनी
उर्वी गुर्वी गुरुश्रेष्ठा निगुणा त्रिगुणात्मिका
राज्ञामाज्ञा महाप्रज्ञा सगुणा निर्गुणात्मिका
महाकुलीना निष्कामा सकामा कामजीविनी
कामदेवकलारामाभिरामा शिवनर्तकी चिं
तामणिः कल्पलता जाग्रती दीनवत्सला का
र्तिकी कृत्तिका कृत्या अयोध्या विषमा समा

श्री॰
२. संमंत्रा मंत्रिणी पूर्णा ह्लादिनी क्लेशनाशिनी
त्रैलोक्यजननी कृष्णा निर्मांसा कालरूपिणी
8 तडाकनिस्वजठरा शुष्कमांसास्थिमालिनी
अवंती मधुरा हृद्या त्रैलोक्यव्यापिनीश्वरी
व्यक्ताव्यक्तानेकमूर्तिः शरभी भीमनादिनी
क्षेमंकरी शंकरी च सर्वसम्मोहकारिणी
ऊर्ध्वतेजस्विनी क्लिन्ना महातेजस्विनी तथा
अद्वैता भोगिनी पूज्या सुरभी सर्वमंगला
सर्वप्रियंकरी भोग्या धरणी पिशिताशना
भयंकरी पापहरा निष्कलंका वशंकरी
आशा तृष्णा चंद्रकला तनरूणा वायुवेगिनी
सहस्रसूर्यसंकाशा चंद्रकोटिसमप्रभा
वह्निमंडलमध्यस्था सर्वसत्त्वप्रतिष्ठिता
सर्वाचारवती सर्वदेवकन्यातिदेवता ८
दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिणी ९
इज्या पूज्या विभीर्भूतिः सत्कीर्तिर्ब्रह्मरूपिणी
रंभोरुश्चतुरा राका जयंती वरुणा कुहूः
मनस्विनी वेदमाता यशस्या ब्रह्मचारिणी
सिद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी
अगाधरूपिणी ध्येया मूलाधारनिवासिनी

आत्माप्रज्ञापूर्णिमनाञ्छन्दस्युद्योतकुलिनी वा त्रि॰
वधूकानिम्ननाभिः समसंस्थाहृद्गता आ
नीविकीर्दण्डनीति पीत्रिदिवसुन्दरी ज्वलि
नी ज्वालिनी शैलतनया विंध्यवासिनी प्रत्य
न्ता विचशोधेधात्रीयाविमलातुला प्रगल्भा
वारुणी छाया वशिनी विस्फुलिङ्गिनी भु
क्ति सिद्धिः सदा प्राप्तिः प्राकाम्या महिमाणि
मा इच्छासिद्धिर्वशित्वा चईशित्वोर्ध्वनिवासि
नी लघिमा चैव गायत्री सावित्री भुवनेश्वरी
मनोहरा चिन्ता दिव्या देवी उदारा मनोरमा पि
ङ्गला कपिला जिह्वा मत्ता रसिका रमा सु
षुम्ना इडा योगवती गान्धारी नरकान्तका पा
वाली रुक्मिणी राधाराध्या भीमा धियका पि
का अमृता तुलसी हंसा कैटभी कपटेश्वरी
उग्रचण्डेश्वरी वीरजननी वीरसुन्दरी उग्रा
नारायणी दक्षा देवकी देवमानिनी निरञ्ज
ना चित्रा देवी क्रोधिनी कुलदीपिका कुल
वागीश्वरी ज्वाला मातृका द्राविणी द्रवा यो
गीश्वरी महामारी भ्रामरी विन्दुरूपिणी ह
नी प्राणेश्वरी गुप्ता बहुला [illegible]मरी प्रभा कु
जा

पुण॰

२॰ उड्डिकान्तानिनीज्येष्ठाभुसूउग्रकटाकृतिः
द्राविणीगोपिनीमायाकामवीजेश्वरीप्रिया
शाकंभरीकोकनदाशुसलाश्रान्तिलोन्नमा
श्रीमायाविक्रमाक्रूरांप्रविद्धालात्रिविक्रमा
दु॰ स्वस्तिहव्यवहाप्रीति[illegible]राधूम्रार्चिरंगदा न
पिनीतापिनीविश्वभोगदाभोगधारिणी
त्रिखण्डबोधिनीवश्यमकलाशक्तिरूपिणी
वीजरूपामहामुद्रावशिनीयोगरूपिणी
अनंगमदनानंगरेखानंगांकुशेश्वरी अ
नंगमालिनीकामेश्वरीसर्वार्थसाधिका
सु॰ सर्वमंत्रमयीमोहम[illegible]रूपानंगरूपिणी व
ज्रेश्वरीवज्रपिणीसर्वदुःखक्षयंकरी षड
योग॰ ग[illegible]युवतीयु[illegible]त्वालांममालिनी
उड्याणयाउडाचारादुर्जयादुर्गरूपिणी दु
रंतादुष्कृतिहरादुर्ध्येयादुरतिक्रमा हं
सेश्वरीत्रिकोणस्थाशाकंभर्यनुकंपिनी
त्रिकोणनिलयानित्यापरमामृतरंजिता
पै॰ महावि[illegible]श्वरीश्वेताभीरुंडाकुलसुंदरी
नवितामक्तिसंयुक्ताभक्तिवश्यासनातनी
भक्तानंदमयीभक्तभवितामय[illegible]
भंजिनी

सर्वसौंदर्यनिलया सर्वसौभाग्यशालिनी स
र्वसंभोगभवना सर्वसौख्यानिरूपिणी कुमा
रीपूजनरता कुमारीप्रीतिदायिका कुमारीभ
क्तिसुखिनी कुमारीरूपधारिणी कुमारीपू
जकप्रीता कुमारीप्रीतिदप्रिया कुमारीसेव
कासंतुष्टा कुमारीसेवकालया आनंदभैरवी
बालभैरवी वटुभैरवी श्मशानभैरवी का
लभैरवी पुरभैरवी महाभैरवपत्नी च पर
मानंदभैरवी सुरानंदभैरवी च उन्मादान
दभैरवी तथा महाकालभैरवी ज्ञानानंदसु
भैरवी महाभयंकरी तीव्रा तीव्रवेगा तरस्वि
नी त्रिपुरा परमेशानी सुंदरी पुरसुंदरी
त्रिपुरेशी पंचदशी पंचमी पुरवासिनी म
हासप्तदशी चैव षोडशी त्रिपुरेश्वरी म
हांकुशस्वरूपा च महाचक्रेश्वरी तथा न
वचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी राज
राजेश्वरी धीरा महात्रिपुरसुंदरी सिंदू
रपूररुचिरा श्रीमत्त्रिपुरसुंदरी सर्वांग
सुंदरी रक्ता रक्तवस्त्रोत्तरीयणी जवायाव
कसिंदूररक्तचंदनधारिणी चामरीकारा

पुपा॰ २॰ कुट्मलानिमलश्यामकेशिनी वज्रमौक्ति
करत्नाढ्याकिरीटमुकुटोज्वला रक्तकुंड
लमंडलास्फुरद्गंडमनोरमा कुंजरेश्व
रकुंभोत्थमुक्तारंजितनासिका मुक्ता॰
विद्रुममाणिक्यहाराढ्यस्तनमंडला सू
र्यकांतेंदुकांताढ्यस्पर्शमकंठभूषणा
बीजपूरस्फुरस्मरदंतपंक्तिरनुत्तमा का
मकोदंडकाभुग्नभ्रूकटाक्षप्रवर्षिणी मा
तंगकुंभवक्षोजालसत्कोकनदेक्षणा म
कु॰ नोज्ञशष्कुलीकर्णा हंसगतिविडंबिनी प
द्मरागांगदद्योतद्दोश्चतुष्कप्रकाशिनी ना
नामणिपरिस्फूर्जच्छुद्धकांचनकंकणा
नागेंद्रदंतनिर्माणवलयांचितपाणिनी
अंगुलीयकचित्रांगीविचित्रक्षुद्रघंटिका
पट्टांबरपरीधाना कलमंजीररंजिनी क
र्पूरागुरुकस्तूरीकुंकुमद्रवलेपिता वि
चित्ररत्नपृथिवीकल्पशाखितलस्थिता
रत्नदीपस्फुरद्रत्नसिंहासननिवासिनी
षट्चक्रभेदनकरी परमानंदरूपिणी स
हस्रदलपद्मांतश्चंद्रमंडलवर्तिनी ॐ

ब्रह्मविष्णुशिवक्रीडा नानाभवविलासिनी
हरिविष्णुविरिंचेंद्र ग्रहनायकसेविता श्री
मयोनिर्जगद्योनिर्ब्रह्मयोनिरयोनिजा भ
गरूपा भगस्था त्रिभगिनी भगवासिनी भगा
त्मिका भगाधाररूपिणी भगमालिनी लिं
गाभिधायिनी लिंगप्रिया लिंगनिवासिनी
लिंगस्था लिंगिनी लिंगरूपिणी लिंगसुंदरी
लिंगस्था लिंगिनी लिंगप्रिया लिंगसुंदरी भ्रू॰
चै॰ शिवाशिवी च रुद्राणी शिवे [illegible] शिवनादिनी
मातंगी [illegible] मातीना सैवानंतमालिनी डा मो॰
किनी योगिनी चैव तथोपयोगिनी म[illegible]ता
माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी अ
लंबुषा वेगवती क्रोधरूपा सुमेखला गां
धारी गजजिह्वा च दुर्गा चैव शुभंकरी पिंग
नि॰ ला ब्रह्माणी [illegible] च सद्गुणा चैव गांधिनी लिंग
चै॰ स्थितेन लिंगेशी त्रिपुरा भैरवी तथा लिंग
स्था लिंगेश्वरी [illegible] लिंगगीति सुगीती कालिं
गमाला लिंगभवा लिंगलिंगा च पार्वती भ
गवती कौशिकी च प्रेमा चैव प्रियंवदा ग
ध्ररूपा शिवरूपा चक्रेशी चक्ररूपधृक ।

श्रा॰
२॰ लिंगगीतिर्लिंगप्रीतिर्भगगीतिः सदारतिः
लिंगनामसदानन्दा भगनामा सदारतिः लिं
गमालाकण्ठभूषा भगमालाविभूषणा भ
गलिंगामृतप्रीता भगलिंगामृतात्मिका
भगलिंगार्चनप्रीता भगलिंगस्वरूपिणी भ
गलिंगस्वरूपा च भगलिंगसुखावहा स्व
यंभूः कुसुमप्रीता स्वयंभूः कुसुमार्चिता स्व
यंभूः कुसुमप्राणा स्वयंभूः कुसुमोत्थिता
स्वयंभूः कुसुमस्नाता स्वयंभूः कुसुमार्पिता
स्वयंभूः पुष्पघटिता स्वयंभूः पुष्पधारिणी
स्वयंभूः पुष्पतिलका स्वयंभूः पुष्पचर्चिता
स्वयंभूः पुष्पनिरता स्वयंभूः कुसुमग्रहा स्व
यंभूः पुष्पयज्ञांगा स्वयंभूः कुसुमात्मिका
स्वयंभूः पुष्पनिलघ्ना स्वयंभूः कुसुमप्रिया स्व
यंभूः कुसुमाधा[illegible]लालसोन्मत्तमानसा
स्वयंभूः कुसुमानन्दलहरीस्निग्धदेहिनी स्व
यंभूः कुसुमाधारा स्वयंभूः कुसुमालया स्वयं
भूः पुष्पनिलया स्वयंभूः पुष्पवासिनी स्व
यंभूः कुसुमस्निग्धा स्वयंभूः कुसुमोत्सुका
स्वयंभूः पुष्पहारा च स्वयंभूः पुष्पमालिका

स्वयंभूः कुसुममासासा स्वयंभूः कुसुमप्रभा
स्वयंभूः कुसुमज्ञाना स्वयंभूः कुसुमव्रता
स्वयंभूः कुसुमध्याना स्वयंभूः पुष्पभोगिनी
स्वयंभूः कुसुमोल्लासा स्वयंभूः पुष्पवर्षिणी
स्वयंभूः कुसुमानंदा स्वयंभूः पुष्पपोषिणी
स्वयंभूः कुसुमोत्साहा स्वयंभूः पुष्परूपिणी
स्वयंभूः कुसुमोत्साहा स्वयंभूः पुष्पसुन्दरी
स्वयंभूः कुसुमाराध्या स्वयंभूः कुसुमोद्भवा
ग्रा स्वयंभूः कुसुमव्य[illegible] स्वयंभूः पुष्पपूजिता स्व
यंभूः पूजनकव्रता स्वयंभूः होतृमातृका स्वयं
ड्री भूः तर्पिर्कि[illegible] स्वयंभूः भक्तिभाविता स्व
यंभूः पूजनकाग्रस्या स्वयंभूः पूजनकप्रिया स्व
यंभूः वंदारुकर्याता स्वयंभूः नैन्दिका[illegible]का स्व
यंभूः प्रदसर्वस्वा स्वयंभूः प्रदपवित्रिणी स्व
यंभूः प्रदसत्स्मेरा स्वयंभूः प्रददैवेरिणी सर्व
लोकोद्भवप्रीता सर्वकालोद्भवोद्भवा कु
ण्डपुष्पैः सदाप्रीतिर्भग[illegible]पुष्पसदारतिः कु
ण्डगोलोद्भवप्रीता कुण्डगोलोद्भवात्मिका
वा स्वयंभूर्वा शि[illegible] धात्री पावनी लोकपावनी
कीर्तिर्यशस्विनी मेधा विमेधा शुक्रसुन्दरी

पृ॰ १॰ सुखदामोक्षदामोक्षामोक्षदात्मप्रकाशिनी
शुक्लाधाराशुक्लरूपाशुक्लसिन्धुनिवासिनी
12 शुक्लालयाशुक्लभोगाशुक्लपूजासदारतिः
शुक्लपूज्याशुक्लहोमासन्तुष्टाशुक्लवत्सला
शुक्लमूर्तिःशुक्लकरीशुक्लपूजकपुत्रिका शु
क्लस्थाशुक्लिणीशुक्लसंपदाशुक्लसुन्दरी शु
क्लस्नाताशुक्लदेहाशुक्लतुष्टातिशुक्लिणी
महाशुक्लाशुक्लभवाशुक्लवृष्टिविधायिनी
शुक्लाभिधेयाशुक्लार्हाशुक्लकन्दर्पवंदिता
शुक्लानन्दकरीशुक्लासदानन्दविधायिनी शु
क्लोत्सवासदाशुक्लापूर्णाशुक्लमनोरमा शु
क्लपूजकसर्वस्वाशुक्लनिन्दकनाशिनी शु
क्लात्मिकाशुक्लसंपच्छुक्लकर्षणकारिणी
शारदासाधकप्राणासाधकासक्तमानसा
साधकानन्दसन्तोषासाधकाधिविनाशिनी
साधकोत्तमसर्वस्वासाधका[illegible] विघ्ननाशिनी
आत्मविद्याब्रह्मविद्यापरंब्रह्मकुटुम्बिनी त्रि
कूटस्थापंचकूटासर्वकूटशरीरिणी स
र्ववर्णमयीवर्णजपमालाविधायिनी सह
स्रनाम १००० ॥ श्रीशिव उवाच

इतिश्रीकालिकानामसहस्रंशक्तिभाषितम्
गुह्याद्गुह्यतरंसाक्षान्महापातकनाशनम्
पूजाकालेनिशीथेचसन्ध्ययोरुभयोरपि
लभतेगाणपत्यंसयःपठेत्साधकोत्तमः
यःपठेत्साधकोह्यापिशृणोतिश्रावयेदपि
सर्वपापविनिर्मुक्तःसयातिकालिकापदम्
श्रद्धयाश्रद्धयावापियःकश्चिन्मानवःपठेत्
दुर्गाद्दुर्गतरंगत्वादेव्याःपार्श्वचरोभवेत् व
न्ध्यावाकाकवन्ध्यावामृतवत्साचयाङ्गना
श्रुत्वास्तोत्रमिदंपुत्रांल्लभतेचिरजीविनः
यंयंकामयतेकामंपठन्स्तोत्रमनुत्तमम् दे
वीवरप्रसादेनतंतंप्राप्नोतिनित्यशः स्व
क्लैः यंभूःकुसुमैःशु[illegible]सुगन्धिकुसुमान्वितैः
अर्घाघावकस्तूरकचन्दनसंयुतैः म
त्स्यमांसादिभिर्घोरैर्मधुभिःसाज्यपायसैः
भक्तोपनीतैर्मंत्रेणसाधितैःशक्तिभिःसह
पंचोपचारैर्नैवेद्यैर्बलिभिर्वरशोणितैः दी
पैर्धूपैर्महादेवींपूजयित्वामनोरमैः ज
प्त्वामहामन्त्रंस्तोत्रंपठेद्भक्तिसमन्वितः अ
नन्यचेताःस्थिरधीर्मुक्तकेशोदिगंबरः श्म

पृणा: २:

वान्नुत्थिस्मिन्नास्थो वा श्मशानालयमागतः
शून्यालयगतो वापि शर्य्यास्थो वापि वात्मकः
13 सम्भवेत्कालिकापुत्र इति ख्यातिमुपागतः
सर्वविद्यावतंश्रेष्ठोयनेनचयनाधिपः वा
युतल्पवलो लोके दुर्जयः शत्रुमर्दनः स
त्री र्वसंकटमु[illegible]र्यः सर्वसिद्धिसमन्वितः स
युमत्या स्वयंदेवा सेव्यमानोस्मरोपमः
महेशइतियोगेन्द्रः सर्वसत्वपुरस्कृतः ।
कामिनीकामरूपोसौ सर्व[illegible]कर्षकः लकार
जलसूर्येन्दुवायूनां स्तंभको राजवल्लभः
यशस्वी सत्कविर्धीमान् स्वमंत्री कोकिलस्वनः
वरूपश्रीगजास्थानामीस्वरोधार्मिकः कृती
मार्कण्डेयइवाप्याज्जरापलितवर्जितः
नवयौवनयुक्तः स्यादपि वर्षसहस्रवान् न
किंचिद्दुर्लभं लोके यद्यन्मनसि कल्पितम्
ब्रह्महत्यासुरापानस्तेयं गुर्वंगनागमः
सर्वमाशु तरत्येव स्तवस्यास्य प्रसादतः र
जस्वलाभगं पश्यन्नुसा कालीमहामनुं मू
लेवेनानेन संस्तुत्य साधकः किं न साधयेत्
परदाररतो वापि मंत्रं जप्त्वा पठेत्स्तवम् ।

कुबेरश्च विविनाढ्यो जायते मदनोपमः अष्टो
त्तरशतं जप्त्वा यो निर्मम्प्रमस्तवित् सकृत्प
ठनात्तस्य सर्वविघ्नक्षयो भवेत् दिगंबरो
मुक्तकेशः शाव्यस्थो मिथुने रतः जप्त्वा
स्तवं महाकाली विचरो जायते तु चिरात् य
दि योषित्संसर्गी स्वदारे तु प्रयत्नतः सम्ब
ध्यायतो जप्यते नस्युः सर्वसिद्धयः शुक्रो
त्सारणकाले च जपपूजापरायणः श्मशा
ने कालिकां स्तुत्वा वाणीवत्सकविर्भवेत्
आलोक्य यक्षिणीयन्त्रं वा विवस्त्रां परयोषितम्
जप्त्वा स्तवं महाकाली विचरो जायते चिरा
त् स्मरेतश्च मन्त्रं जप्त्वा स्तवं भगवतो शिवाम्
सर्वपापपरिमुक्तो मानवः स्यात्कुकोपमः
कृष्णपक्षे तु संक्रान्तिचतुर्दश्यष्टमीषु च न
वम्यां मङ्गलदिने पठेत्स्तोत्रं स साधकः भौ
मावस्यां निशीथे च चतुष्पथगतो नरः मा
समक्तबलिं दत्त्वा सतुग्यमीनशोणितम्
अष्टोत्तरशतं जप्त्वा पठेन्नामसहस्रकं सु
दर्शनो भवेद्राशुदेवगन्धर्वसेवितम् ये
नकेन प्रकारेण कालीभक्तिपरायणः

पुरा॰
२॰

स्तंभयेद्यदिवैनालोकान्त्राज्ञानमपिमोहयेत्
आकर्षयेद्देवकन्यां वा यद्यपि केशवम् मा
रयेद्यदि विलानेद्दृष्टानुच्चाटयति शात्रवान्
नरमार्जारमहिषच्छागमूषकशोणितैः
सास्थिमांसैः समधुभिः सामृतैर्जयपायसैः
योनिक्षालिततोयेन भगलिङ्गामृतेन च श्र
कैः पूजाजपान्तेच कालीमन्त्रस्य साधकः
सहस्रनामभिर्दिव्यैः स्तौति भक्तिपरायणः
मातैव कालिका तस्य सर्वत्र हितकारिणी
पानिन्दापरद्रोहपरवादपरायच [illegible] वे॰
लायपरतन्त्राय भ्रष्टाचारसाधकायच द
रिभक्तिविहीनायपरदाररतायच पूजा
जपविहीनायपरस्त्रीनिन्दकायच नस्त
वं दर्शयेद्दिव्यमहस्रं शिवहा भवेत् कु
लीनाय महेच्छाय दुर्गाभक्तिपरायच वै
ष्णवाय विशुद्धाय भवभक्ताय मान्त्रिणे अ
द्वैतानन्दरूपाय निवेदितरतायच दया
स्तोत्रं महाकालस्य साधकाय न दातव्या
वल्लविल्वमहेशानामभेदेन महेश्वरी
शिवाभक्ताय दुष्टाय दूषकाय दुरात्मने ॥८

समंत्रान्भावयेन्मंत्रीमहेशोनात्रसंशयः
सशाक्तःशिवभक्तश्चसएववैस्नवोत्तमः
सएज्यस्तौतियःकालीमद्वैतभावमावहन्
देव्यानन्देनमानन्दोदेवीभक्तश्चभक्तिमान्
सएवधन्योयस्यार्थेमहेशोव्यग्रमानसः
कामयित्वायथाकामंस्तवमेनमुदीरयेत्
सर्वरोगपरित्यक्तोजायतेमदनोपमः च
क्रंवास्तवमेनंवाधारयेदङ्गसङ्गतं वि
लिख्यविधिवत्सायुःसएवकालिकातनुः
देव्यानिवेदितंयद्यत्तत्सर्वंभक्षयेन्नरः दि
व्यदेहधरोभूत्वादेव्याःपार्श्वचरोभवेत् नै
वेद्यनिन्दकंदृष्ट्वानृत्यन्तियोगिनीगणाः
रक्तपानोद्यतासर्वामांसास्थिचर्वणोद्यताः
तस्मान्निवेदितंदेव्यैदृष्ट्वाश्रुत्वाचमानवः
ननिन्देन्मनसावाचासर्वव्याधिपराङ्मुखः
आत्मानंकालिकात्मानंभावयन्स्तौतिमान
वः शिवोपमंगुरुंध्यात्वासएवास्तिसदा
शिवः यस्यालयेतिष्ठतिनूनमेनंस्तोत्रं
भवान्यालिखितंविधिज्ञैः गोरोचनाल
क्तककुङ्कुमांककर्पूरसिन्दूरमधुद्रवेण
द्र

श्या॰
र॰
15

न तत्र चौरस्य भयं न दस्योर्मनोरथो नाशानव
ह्निभीतिः उत्पातवाताघोरपि नात्र शंका लक्ष्मीः
मीः स्वयं तत्र वसेदलोला स्तोत्रं पठेन्नेत
दनन्तपुण्यं कालीपदांभोजपरो मनुष्यः
विद्यानवद्या फलमेव सम्यक् प्राप्नोति सं
पूर्णमनोरथोसौ मुक्ताः श्रीचरणारविन्द
विमुखाः स्वर्गासिनो भोगिनो ब्रह्मापि रुद्र
शिवात्मकार्चनसुखं लोकेपि संलेभिरे
श्रीमच्छंकरभक्तिपूर्वकमहाकालीपदध्या
यिनो भुक्तिमुक्तिमती स्वयंस्तानि परामुक्तिः
करस्थायिनी इति श्रीकालीफलसर्वस्व
शिवपरशुरामसंवादे महाकाली श्रीद॰
क्षिणकालीनामसहस्रस्तवराजः समा
प्तम् संपूर्णम् शुभम् ॥

ॐ अथ कालीस्तोत्रम् ॥ श्रीभैरव
उवाच महाकालप्रवक्ष्यामि देव्याः सु
स्तोत्रं रहस्यकम् यत्तुल्यं परमं पुण्यं सर्व
भयविनाशनम् महतीचेतनामा
या महादेवी महेश्वरी ॥ ॥

महाबुद्धिर्महावाणीमहाकालीमहाकला
महाशुद्धामहाबुद्धामहानिद्रामहोद्भवा
महाशुभ्रामहालक्ष्मीर्महाभागामहोदया
महामोहामहातुष्टिर्महापुष्टिर्महाजया
महाधृतिर्महादंष्ट्रामहाद्युतिर्महामतिः
महाकान्तिर्महापद्मामहासिद्धामहातपाः
महाक्षुधामहोत्साहामहाबोधामहाबुधा
महावचनसंहर्त्रीमहाभयविनाशिनी
महानेत्रामहावक्त्रामहाजिह्वामहाभुजा
महामहीमहापाणिर्महाघोषामहानखा
महाशान्तिर्महाक्रान्तिर्महाभ्रान्तिर्महा।
मतिः महास्थानामहामुद्रामहापर्वतवा
सिनी महाब्रह्ममयीमातामहाकायाम
हारवा महासुराश्रीर्महतीपार्वतीचंडि
काशिगा महाकुलामहालोलामहामा
नामहायना महानीलामहाशैलामहा
वादामहाबला महाचित्तामहावित्तामहा
देवर्षिशासिनी महाविद्यामहासाध्या
महामेध्यामहामहाः महाप्सरामहाद
र्पामहादुःखप्रनाशिनी महामोक्षप्रदा।

मोहा महादन्ता महायोगिनी महायुद्धा म-
हावाणी महाशोकविनाशिनी महाका
रा महाधारा महामाया वरेश्वरी महाक्षे
मकरी हेम्ना महैश्वर्यप्रदायिनी महा-
विषघ्नी विषहरा महादुर्गप्रणाशिनी म
हादुर्गा महातत्वा महाकैलासवासिनी
महास्वतन्त्रा सुभगा महैश्वर्यं महामती
महाश्मशाननिलया महाप्रेतकपालिनी
महाशक्तिर्महाभक्तिर्महामङ्गलकारिणी
य इदं कीर्तयेद्भक्त्या विषमस्थो भवेद्यदि
लोहपञ्जरमध्यस्थस्तस्य नश्यन्ति बन्धनं
राजानो दासतां यान्ति भवेत्सर्वजनः प्रियः
सर्वलोकप्रियस्सोपि तस्य नश्यन्त्युपद्रवाः
सङ्ग्रामे विजयश्चैव विग्रहे प्राप्नुयान्निव
निर्विघ्नं सततं देहे न मृत्युः पावके जले
नाकाले मरणं तस्य कदाचिन्न भविष्यति
यं यं कामयते कामं तं तं प्राप्नोति निश्चयः
बहुना किमिहोक्तेन सर्वसिद्धिप्रदं नृणाम्
इति श्रीरुद्रयामले तन्त्रे भैरवमहाकालसं
वादे प्रणामास्तोत्रं समाप्तं ॥ मू ॥ ॥

अथमहाकालीस्तोत्रम ॐ कर्पूरंमध्य
मान्त्यस्वरपररहितंसेन्दुवामाक्षियु
क्तंवीजंतेमातरेतत्त्रिपुरहरवधूस्त्रिः
कृतंयेजपन्ति तेषांपद्यानिगद्यानि
चमुखकुहरादुल्लसन्तीववाचः स्वछ
न्दंध्वान्तधाराधररुचिरुचिरेसर्वसिद्धिं
गतानाम् ईशानंसेन्दुवामश्रवणपरि
गतंवीजमेतन्महेशिद्वन्द्वंतेमन्दचेता
यदिजपतिजनोवारमेकंकदापि जित्वा
वाचामधीशंधनदमपिचिरंमोहयन्नं
वुजाक्षीवृन्दंचन्द्रार्धचूडेप्रभवतिसमहा
घोरघोरावतंसे २ ईशोवैश्वानरस्थःश
शधरविलसद्वामनेत्रेणयुक्तं वीजं
तेद्वन्द्वमन्यद्विगलितचिकुरेकालिकेयेज
पन्ति द्वेष्टारंतेनिहन्तित्रिभुवनमभितो
वश्यभावंनयन्ति सृक्किद्वन्द्वास्रधाराद्व
यधरवदनेदक्षिणेत्र्यक्षरेति ३ ऊर्ध्वंवामे
कृपाणंकरकमलतलेछिन्नमुण्डंतथा
ति॰ धः सव्येभीतिंवरंचत्रिजगदघहरेदक्षि
णेकालिकेच जप्त्वैतन्नामवर्णंतवमन

श्या॰
२॰

बिम्बं भावयन्तेस्तदं वन्ते धाम्नि सेष्टौ करस्थाः
प्रकटितवरदे नेत्रसिद्धयस्तस्य वकस्य ४ व
र्गीयं वह्निपुक्तं वियुरतिमिलितं तद्व्रयं
कूर्चयुग्मं लज्जाद्वन्द्वं च पश्चात्स्मितमुखि
तदयष्ठद्वयं योजयित्वा मातर्ये त्वां ज
पन्ति स्मरहरमहिले भावयन्तः स्वरूपं
ते लक्ष्मीलास्यलीलाकमलदलदृ।
शः कामरूपा भवन्ति ५ प्रत्येकं वा द्व
यं वा त्रयमपि च परं बीजमत्यन्तगुह्यं त्वा।
न्नाम्ना योजयित्वा सकलमपि सदा भाव
यन्तो जपन्ति तेषां नेत्रारविन्दे विहरति
कमलावक्त्रशुभ्रांशुबिम्बे वाग्देवी देवि।
मुण्डस्रगतिशयलसत्कण्ठि पीनस्तना
ढ्ये ६ गतासूनां बाहुप्रकरकृतकाञ्ची
परिलसन्नितम्बां दिगम्बरां त्रिभुवनविधा
त्रीं त्रिनयनाम् श्मशानस्थां तल्पे शवहृ
दि महाकालसुरतप्रसक्तां त्वां ध्यायन् जन
नि जडचेता अपि कविः ७ शिवाभिर्घोराभिः
शवनिवहमुण्डास्थिनिकरैः परं संकीर्णा
यां प्रकटितचितायां हरवधूं प्रविष्टां सन्तुष्टा

मुपरि स्मरतेनापि युवतीं सहातां ध्यायन्ति
कश्चिदपि न ते तेषां परिभवः ८ वदाम स्ते किं
वा जननि वयमुच्चैर्जडधियो न धाता नापी
शो हरिरपि न ते वेत्ति विभवम् तथापि त्वच्चा
रित्रं मुखरयति चास्माकममिते न देतत्त्वन्त
व्यं न खलु पशुरोषः समुचितः ९ समन्ता
दापीनस्तनजघनदृग्यौवनवतीरतास्तः
कैर्नाकं यदि जपति भक्तस्तवमनुम् श्रि
वामात्वां ध्यायन्नलितविकरस्तस्य वशा-
गाः समस्ताः सिद्धाद्या भुवि चिरतरं जीवति
कविः १० समाभ्रस्तीभूते जगति विपरीते
यदि सदा विविनस्त्वां ध्यायन्नतिशयमहा
कालयुवतीम् नदानस्यस्तोत्राणि न लविह्र
३० रमाँन स्यवितुषः करांभोजेवश्याः हर
वपुमहासिद्धिनिवहाः ११ प्रसूते संसारं ज
ननि जगतीं पालयति च समस्तं क्षित्यादि च
लयसमये संहरति च अतस्त्वं धातापि त्रिभु
वनपतिः श्रीपतिरपि महेशोपि प्रायः सक
लमपि किं स्तोत्रं भवतीम् १२ अनेकैः सव
न्ते भवदधिकगीर्वाणनिवहान्विमूढास्ते मा

प्रपा॰
र॰
18

नः किमपि न विजानन्ति परमम् समाराध्यामाद्यां हरिहरविरिञ्च्यादिविबुधैः प्रपन्नो
ऽस्मि स्वैरं रतिरसमहानन्दनिरताम् १३ ध
रित्री कीलालं शुचिरपि समीरोऽपि गगनं त्व
मेका कल्याणी गिरिशरमणी कालि स
कलम् स्तुतिः का ते मातर्निजकरुणया
मामगतिकं प्रसन्ना त्वं भूया भवमनु न भूया
न्मम जनुः १४ श्मशानस्थः स्वस्थो गलि
तचिकुरो दिक्पटधरः सहस्रं त्वर्काणां नि
वी॰ जगलितवीर्येण कुसुमम् जपंस्त्वत्प्रत्ये
कं मनुमपि तव ध्याननिरतो महाकालि
स्वैरं स भवति धरित्रीपरिवृढः १५ गृहे सं
मार्जन्या निजगलितबीजं हि चिकुरं समू
लं मध्याह्ने वितरति चितायां कुजदिने स
मुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सत
तं गजारूढो याति क्षितिपरिवृढः सत्कवि
वरः १६ सुपुष्पैराकीर्णं कुसुमधनुषो म
न्दिरमहो पुरो ध्यायन्ध्यायञ्जपति यदि भक्तस्तव
मनुं स गन्धर्वश्रेणीपतिरिव कवित्वामृ
तनदीनदीनः पर्यन्ते परमपदलीनः प्रभवति १२

त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां म
हाकालेनोच्चैर्मदनरसलावण्यनिरतां म
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो ज
नो यो ध्यायेत्त्वामयि जननि स स्यात्स्मरहरः १८
सलोमास्थि स्वैरं पललमपि मार्जारमसिते
परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा
बलिं ते पूजायामपि वितरतां मर्त्यवसतां त
सतां सिद्धिः सर्वा प्रतिदिनमपूर्वा प्रभवति १९
वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणकमलध्याननिपुणः
परं नक्तं नग्नो निधुवनविनोदेन च मनुं जनो
लक्षं स स्यात्स्मरहरसमानः क्षितितले २०
इति स्तोत्रं मातस्तव मनुसमुद्धारणजपस्व
५८ रूपाख्यं पादाम्बुजयुगलपूजाविधियुतम्
निशार्धे वा पूजासमयमधि वा यस्तु पठति २१
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः
कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं वश
स्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः रि
पुः कारागारं कलयति च तं केलिकलया चि
रं जीवन्मुक्तः स भवति सुभक्तः प्रतिजनि २२

पृष्ठा· १·

अथ कालीस्तोत्रम् ॐ ध्यायन्ति दीनार्तिह-
ं दक्षिणमां करे स्थितं त्रस्तं रसं पिबन्ति भ्रू-
भङ्गमात्रेण जनानन्दं जनितं तस्यानुग्रतःपात्र-
करः कपाली। कल्पद्रुमवने रम्ये रत्नसिं-
हासनोपरि। उमया सहितो रुद्रः पप्रच्छ
नन्दिकेश्वरम्। नन्द्युवाच देवदेव जगन्ना-
थ सृष्टिस्थामि परमेश्वर। केन कामकरी
वृद्धिः प्रकाशयति निश्चितम्। श्रीमहादेव
उवाच साधु पृष्टं महाभाग त्वयाद्भुततरं
महत्। कालिकायाः स्तवः स्तोत्रं कीर्तनं नास्ति
हितं मम। निशार्धे वादिने यैवा श्मशा-
ने शान्तनायकः। क्रियते तीर्थसंयुक्तं निसं-
ग्रस्य सहस्रकम्। ॐ अस्य श्रीकालिकादे-
वीस्तवःस्तोत्रकीर्तनस्य श्रीमहादेव ऋ-
षिः शार्दूलच्छन्दः श्रीकालिकादेवी देव-
ता क्रीं बीजं स्वाहा शक्तिः कामप्रार्थ्य प्रसा-
दने विनियोगः। वामे कर्णे शशी च दक्षिण-
रविगण्डस्थले कुण्डलं नासामौक्तिककस्त-
रत्नसुभगे केयूरसन्नाउव श्योमेकु-
ङ्कर कालिमालवपटः स्कन्देव विभ्राजिते

दंष्ट्राकालकरालचर्वितजगत्श्रीकालिकायै
नमः १ चामुण्डेकरचण्डमुण्डनरहन्माला
ट्टहासैर्युताः दुर्दर्शा दशनोज्ज्वलाज्वलनिभ
कालाः कलालैरवाः ऊर्ध्वकेशकृपाणवह
यकराभीमातिमांसनमाम्बचैतन्यास्थिरिपुः
समस्तमसराजश्रीकालिकायैनमः २
हस्तेदक्षिणचालिपात्ररुचिरंब्रह्मकपालं
कृतांवामपाणितलेपुचर्वणीनरादेवारि
दैत्यारिकान् ब्रह्माण्डोदरकूर्मिमध्यचमयुः
पानायमत्तः सदाप्रेतारूढमहासमाहितर
तेः श्रीकालिकायैनमः ३ दिव्याभूषणभू
षितांवरधरांमालागिरसोधरांउन्मनाम
दरूपणानव महामुण्डावलिविभ्रते मल
भूषणभूषितांस्तनरुचींनीलंघनंरञ्जिते
नित्यरक्तवरप्रदाननिरतांश्रीकालिकायै
नमः ४ यइमांपठतेनित्यंदेविश्लोकचतु
ष्टयीम् इष्टिंतान्सर्वदंनित्यंकविर्भवति।
निस्पशाः श्रद्धस्यांवचतुर्दश्यांसंक्रान्तो।
ग्रहणेशुभे भौमवारेरविवारेजीवन्मुक्तो
नसंशयः इतिश्रीकालिकाचतुःश्लोकीसं

श्या०
२०
20

पूर्णं समाप्तम् ॥ इति श्रीपूर्णानन्दपरम
हंसविरचिते श्यामारहस्ये चतुर्थः परिच्छेदः
४ श्रीकालिकायै नमः अथ मन्त्रसिद्ध्यर्थ-
मादौ पुरश्चरणविधिर्लिख्यते तत्र का-
लीतन्त्रे आदौ पुरस्क्रियां कुर्यान्नियमेन य-
थाविधि लक्षमेकं जपेद्दिवा हविष्याशी दि-
वा शुचिः रात्रौ ताम्बूलपूर्णास्यः शय्यायां लक्ष-
मानतः ततः सिद्धमनुर्मन्त्री प्रयोगार्हो न चान्य-
था जीवहीनो यथा देही सर्वकर्मसु न क्षमः
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्तितः त-
स्मादादौ पुरश्चर्यां कुर्वात् साधकसत्तमः ना-
नाचारं न कर्तव्यं नानाचारमितस्ततः भूतहिं-
सां न कर्तव्यां पशुहिंसा विशेषतः बलिदानं
विना देवि हिंसां सर्वत्र वर्जयेत् अस्मिन् मन्त्रपुर-
स्कारे निन्दां चैव विवर्जयेत् प्रयोगं च ततः
कुर्यात् सर्वं परमदुर्लभं संतेपि दिवा लक्षं शु-
चिर्भूत्वा हविष्याशी जपेन्नरः ततस्तद्दशां-
शेन होमयेद्विधिवत् प्रिये तर्पयेत्तीर्थतोये-
न पयसा सर्पिषापि वा मधुनान्नादिना मि-
श्रितोयेन परमेश्वरीम् देवीं चाभिषिञ्चेत्

त्तोयैः तर्पणस्य दशांशतः तद्दशांशं हविष्या
न्नैः पूजयेद्भक्तितः प्रिये कालीमन्त्रविदे वि
द्वान् दक्षिणां गुरवे नैवेद्यं पापावं कथितं क
ल्पं वीरकल्पं शृणु प्रिये अमन्त्रापि देवता
गृहमन्त्राणामेकं समभावयद्धिया जपेदेक
मनाः प्रातःकालान्मध्यन्दिनावधि यत्सं
ख्यां यामसमाप्य तत्कर्तव्यमहर्निशं यदि
न्यूनाधिकं कुर्यात्तदा दुष्टो भवेन्नरः तेना
नैव संख्यापूर्तेर्निजदृष्टे जपसंख्यादशां
शतः यथोक्तकुण्डे तु कुर्याद्यथाविधिसं
माहितः अथवा प्रत्यहं जप्त्वा तु कुर्यात्तद्द
शांशतः ततो होमदशांशान्तु कुले संपूज्य
देवताम् तर्पणादिकं कार्यमित्यादि कुला
र्णवेऽपि प्रातः शुक्लाम्बरधरः प्रयतः शुचिमा
नसः दिवा पर्वं प्रकर्तव्यं सर्वकामस्य सिद्ध
ये अष्टैवं विधिना लक्षं प्रजप्य तद्दशांशं
तर्पणं तद्दशांशाभिषेकं तद्दशांशं ब्राह्म
णभोजनं कारयेत् एतद्दशांशो होमादि।
सत्वो द्विगुणजपो विप्रेण कार्यः क्षत्रियेण
त्रिगुणजपः वैश्येन चतुर्गुणः इति तदुक्तं कु

पुणा॰
२॰

21

कुलप्रकाशे यद्यदङ्गं विहीयेत तत्संख्योद्वि
गुणं जपम् कुर्वीत त्रिसूत्रतदभ्यन्त संख्यानां
साधको नमः अत्रापि होमकर्मण्यशक्ता
नां विप्राणां द्विगुणो जपः इतरेषां तु वर्णानां
त्रिगुणादिः समीरितः गुरुमन्त्रौ यथैवं मन्
त्राः सिध्यन्ति मन्त्रिणः अथात्र ब्राह्मणभोज
नमप्येवमेव तदुक्तं कुलप्रकाशे एकमङ्गं
विहीयेत मन्त्रान्ते होमवाप्नुयात् अमेषु त
द्विधे विपद्वार्थैः बहुमान्वितैः सम्भोजिते
षु विप्रेषु सर्वे हि सफलं भवेत् सम्यक् सि
द्धे कमन्त्रस्य पञ्चाङ्गोपासनेन हि सर्वमन्त्रा
श्च सिध्यन्ति न संभावात्कलेश्वरि अत्रा
पि सर्वथा भोजयेद्विप्रान् कुलयन्तार्थसि
द्धये विप्राराधनमन्त्रेणाप्यङ्गं साङ्गं भवेदिति
तन्त्रान्तरेपि कृत्वा मन्त्रजपं मन्त्री पुरस्कारार्थ
साधकः दशांशान्तु कुर्याद्धोमं यथोक्तविधि
ना ततः जपाज्जपवत्तर्पणं स्वाहान्तं मन्त्र
मुच्चरन् ततो होमदशांशेन स्वाहान्ते तर्प
येज्जलैः ॐ भगवत्सुर्द्रयेति इति पञ्चाङ्गक
ल्पम् अथ वीरकल्पो यथा तदुक्तं कुलच

ङ्गमण्णे पुरश्चरणकाले तु परयोगाग्रमन्त्र
ने दीक्षितावस्तुपुष्पाद्यैर्भोज्यैः पायसंसम
वैः आरम्भकाले निघृतं सघृतपक्वान्नभोजनम्
नानाविधपिष्टकं च नानारससमन्वितम्
दुग्धं दधि घृतं तक्रं नवनीतं सशर्करम् ना
रिकेलं कपित्थं च नागरङ्गं सुदर्शनम् नि
म्बाकं बीजपूरं च दाडिमीफलमुत्तमम्
नानावमफलं चैव नानागन्धविलेपनम्
वस्त्रं मृगनाभिं च श्रीखण्डं नवपल्लवम्
टङ्कणं लोध्रकं चैव जलं जवनं तथा ना
नाशैलसमुद्भूतं नानालङ्कारभूषितम् श्र
ध्यगेहं समानीय चार्घोदकविशोधितम्
अमृतीकरणं कृत्वा शाकेस्थापितं विनयेन्
शाक्तिविधा तदुक्तं तत्रैव ब्राह्मणी क्षत्रिया
९८ वैश्या शूद्रा चाण्डालभूषणा वेश्या नापितक
मा चर्मकारी योगिनी तथा विशेषैव दुग्ध
पुत्राः सर्वापवकुलाङ्गनाः इति अथ दीक्षि
ता अष्टशाक्तीः क्रमेण संस्थाप्य पूर्ववत्पुटाः
स्थापात्रादिकं स्थापयित्वा अर्घोदकेन ता
अभ्युक्ष्य अमृतमन्त्रेण येनमुद्रया ता अमृती

पूपा.
२.

22

कृत्वाष्टशक्तीरूपभेदं ज्ञात्वा ब्राह्मण्याद्यष्ट
शक्तीनां नामभिर्नामकरणं क्रमेण कृत्वा
आसनादिकं दद्यात् तदुक्तं तत्रैव अष्टक
न्यारूपभेदं विलोक्य सर्वचेष्टितम् ब्राह्म
ण्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः
आसनं प्रथमं दत्वा स्वागतं च पुनर्वदेत् अ
र्घ्यं पाद्यं च पानीयं मधुपर्कं जलं ततः स्ना
पयेद्गन्धपुष्पाद्भिः केशसंस्कारमावहेत्
धूपयित्वा ततः केशान्कौशेयं च निवेदयेत्
ततः स्थानान्तरे पीठमास्तीर्य पादुकां शुभाम्
स्थित्वा तत्र समासीनां नानालंकारभूषणैः
भूषयित्वानुलेपेन गन्धमाल्यं निवेदयेत्
ततस्तां तां शक्तिं पूजाप्रकारेण क्रमेण
ध्यात्वा तासां मूर्ध्नि समावाह्य जीवमांसं कृ
त्वा गन्धपुष्पधूपदीपपानद्रव्यान्नमज्जना
दिकं दत्वा तासां सम्यक्करणं क्रमेण स्तोत्रपठे
न तदुक्तं तत्रैव तां तां शक्तिं समावाह्य मूर्ध्नि
तासां समानयेत् भोज्यं मण्डलमध्ये तु स
र्णपात्रे सुशोभने चर्व्यचोष्यलेह्यपेयं भो
ज्यं भक्ष्यं निवेदयेत् अदीक्षिताय दिमे वक्तो

मंत्रं निवेदयेत् मातर्देवि नमस्तेस्तु ब्रह्मरू
पधरेनघे कृपया परमे विघ्नान्मंत्रसिद्धिं
प्रयच्छ मे १ ॐ महेशि वरदे देवि परमान
न्दरूपिणि कृपया परमे विघ्नान्मंत्रसिद्धिं प्र
यच्छ मे २ ॐ कौमारि सर्वविघ्नेशि कुमारक्री
डनेवने कृपया परमे विघ्नान्मंत्रसिद्धिं प्रय
च्छ मे ३ ॐ विश्वरूपधरे देवि विनतास्तनवा
हने कृपया परमे विघ्नान्मंत्रसिद्धिं प्रयच्छ मे ४
ॐ वाराहि वरदे देवि दंष्ट्रोद्धृतवसुन्धरे कृप
या परमे विघ्नान्मंत्रसिद्धिं प्रयच्छ मे ५ ॐ शा
क्ररूपधरे देवि सुरसंघसुपूजिते कृपया
परमे विघ्नान्मंत्रसिद्धिं प्रयच्छ मे ६ ॐ चामु
ण्डे मुण्डमालासृक्चर्चिते विघ्ननाशिनि कृ
पया परमे विघ्नान्मंत्रसिद्धिं प्रयच्छ मे ७ ॐ
महालक्ष्मि महामाये क्षोभसन्तापनाशिनि
कृपया परमे विघ्नान्मंत्रसिद्धिं प्रयच्छ मे ८
ॐ सितिमातृमये देवि सितिमातृवहिष्कृते
एकैव कृतये देवि विश्वरूपे नमोस्तु ते एता
त्स्तोत्रं पठेद्यस्तु वामकर्णेषु साधकः विद्
ग्या वा समालोकानस्य विघ्ना विनश्यन्ति कृ

पृ·या·
२·
लीनस्यहारिदेवाः कथितास्तवपुत्रक टी
ताकालेनित्यपूजासमयेनार्चयेद्यदि न
स्यपूजाफलंवत्सनीयतेयद्वशात्तैः य
दिश्रीउपपत्ताः स्युः भोजनेनतन्तुष्टाहृदिः
स्थितः स्तोत्रपठेनावश्यावद्भक्तिः प्रजायते
आरभ्यमुखवासादिंताम्बूलंचनिवेदयेत् त
तोदद्यात्सुनर्माल्यंगन्धंचन्दनपंकिलम् वि
सृज्यप्रदक्षिणीकृत्यवरात्प्रार्थ्यसुखीभवेत्
श्रमायदिनगच्छन्तिनिजकर्मातिजानुजा
श्रप्रजावामातलानीमातावत्स[illegible]पू[illegible]का त्ति·
वयमाजातितोवापिहीनापिपरमाकला
पूज्याकुलेशैः सर्वैर्निर्जह्रंकारवर्जितैः स
र्वभावेयकतरापूजनीया प्रयत्नतः स
स्कृतासंस्कृतावापिजननीवाभविष्यति
सर्वाभावेपराः पूज्यामद्दर्शाभ्यासितायतः
एकैश्चकेशलस्ताःपूजार्हस्तत्रभैरवः स
वर्णवहाराः पूज्याब्रह्मविष्णुशिवादयः ए
काचेद्युवतीनत्रपूजिता[illegible]वंलोकिता स
र्वापवपरादेव्याः पूजिताः कुलभैरवः आ
दावन्तेचमध्येचललनापूजाविशेषतः ॥

23

न पूजयति चेत्कान्तां तदा विघ्नैर्विलुप्यते पू
र्वार्जितफलं नास्ति का कथा परजन्मनि
तस्मात्सर्वप्रयत्नेन यदीच्छेदात्मनो हितम्
यत्नतः पूजनीयाः स्युः कुलाकुलजनास्ततः
अथैवं क्रमेण मन्त्रजपादौ मध्ये अन्ते शा
क्तीः पूजयेत् ततो रात्रौ पञ्चमेन संस्कृ
रहस्यमालया युक्तं शंकं च शिरसि सिद्धिदे
वी च ध्यात्वा शिवोऽहमिति भावयन् जपं कु
र्यात् तदूर्ध्वं तत्त्वे रात्रौ मांसरसैर्देवीं पू
जयित्वा प्रयत्नतः ततो नग्नां स्त्रियं नशोर
ताङ्कादयुतोऽपि च जपं लक्षं ततो देवि होम
येज्ज्वलितानले योनिकुण्डे स्थिते सर्पिः
मांसमत्स्ययुतं पृथक् दशांशं तर्पयेन्मं
सों मांसमिश्रेण तु साधकः तर्पणस्य दशां
शेन अभिषिञ्च्याज्जगन्मयीम् दशांशं भो
जयेत्साधु कालिकां साधकः प्रिये मद्य
मांसं च मत्स्यं च वर्णां च प्रदापयेत् ततस्त
तोषयेद्गुरुं वस्त्रस्वर्णादिभिः प्रिये एतत्क
र्त्तव्यथा देवि मन्त्राः सिद्ध्यन्ति निश्चितम् वि
ना पीत्वा सुरां भुक्त्वा मांसं गत्वा रजस्वला यो

पृपा॰
२॰ योजपेद्दक्षिणं देवीनमस्तु: स्वेपदेपदे ।
कालीतंत्रेपि तर्पणस्य विधिं वदेयेन का
र्यासिमाप्नुयेत् तर्पयेद्ब्रह्मयोनिं रक्त ।
धाराघृतेस्तथा मत्स्याभिश्च तथा नष्टका
येनकरणेन च आकर्षिता याः कमायाः
कुलद्रालनजेन च मेषमाहिषरक्तेन न
ररक्तेन चैव हि मूषमार्जाररक्तेन पूजये
मरदेवताम् एवं तर्पणमात्रेण सर्वसिद्धी
श्वरो भवेत् कविता जायते तस्य दासा रस
परंपरा बृहस्पतिसमो भूत्वा देववद्भुवि जा
यते न तस्य पापपुण्यानि जीवन्मुक्तो भवे
द्ध्रुवम् उत्तरतंत्रेपि योनिरूपं त्रिकुण्डं वै कु
तावितस्तिमानतः हस्तविस्तारतस्त्वा वा ।
स्त्वा वापि तथाप्ययः नत्र कार्यो हि मंत्रेण
मात्रस्थाप्यनुकृतिक्रिया महाकालाद्यदेवा ।
म॰ यद्यप्य परमाकृतिम् एवं मद्येन मांसेन
भक्तेन रुधिरेण च कुलद्रव्याणा मांसेन तु ।
सरक्तेन विशेषतः आमिषादिभिरथ्येव
श्मशाने तु कुर्यात्सुधीः कुलसद्भावेपि
रात्रौ नग्नो मुक्तकेशो मैथुने वापि संस्थितः

24

प्रकर्तव्यं प्रयत्नेन सर्वकामार्थसिद्धये द्वि
जातीनां च सर्वेषां दिव्यविधिरिहोच्यते स्त्र
ग्धान्नं च तथा प्रोक्तं रात्रौ विष्टं महाफलं ॥ या
वत्कामयते कामं तत्तदाप्नोति नित्यशः ॥ ८
कालिकाश्रुतौ च । अथ देवि कालिकामन्त्र
जपो यः सदा शुद्धात्मा ज्ञानेन वैराग्ययुक्तः
शांभवदीक्षारतः शाक्तो ग्रवादि वा बलिचा
रीरात्रौ नग्नः सर्वदा मैथुनासक्तमानसः
जपपूजादिनियमो योषित्सर्वप्रियंकरः
शुभोदकेन तर्पणं तेनैव पूजनं सर्वदा का
लीरूपमात्मानं विभावयेत् स सर्वयोषिदा
सक्तो भवति । अथ पंचमकारेण सर्वमाप्नोति
विद्यां धनं यशः सर्वैश्वर्यं कवित्वं च नामसः
परमपस्याविद्यते ज्ञानाय मोक्षाय तत्सर्वं
भूतलं यत्किंचिद्दृश्यमानं स्थावरज
ङ्गमं यत्सर्वं कालिकातत्त्वं तत्सर्वमाप्नो
ति वेदेषु स्फुटं पापान्तरति आगमागमनंत
रति सर्वपापं तरति स सर्वं लक्ष्मीमाप्नोति स स
र्वं जानाति स सर्वसंन्यासी भवति स सर्वमंत्र
जापी भवति स सर्वशास्त्रवेत्ता भवति स सर्वं ।

पूणा·
२·
25
ममनः स्तवम् धर्माधर्मकलास्नेहपूर्णे
वह्नौ जुहोम्यहम् स्वाहान्तोयं महामन्त्रः
शुक्रस्यागे प्रकीर्तितः अथान्यत्र यागोप
था निशायां शक्तिः पूर्वोक्तां स्ववामभागे
समानीय तस्या गात्रे स्वकल्पोक्तस्नानवि
धाय अदीक्षिता चेत्तदा पूर्वोक्ताभिषेकम
न्त्रेण तीर्थादिनाभिषेकं कृत्वा तस्याः क
र्णे भेदत्रयात्मं मूलमन्त्रमुच्चरेत् इति शक्ति
शुद्धिः ततो मकारपञ्चमेन देवीं सम्पूज्य मू
लान्ते धर्माधर्मेत्यादि पठेत् मातृपीठेऽपि
तस्मै दत्त्वा जपं कुर्यात् ततो मूलान्ते प्रका
शेत्यादि पठन् स्तुत्या जपेदिति अथवा मातृ
पीठे सावरणां देवीं सम्पूज्य शिवोऽहमिति
भावयन् उभयोः सङ्गमं कृत्वा पूर्ववज्जपा
दिकं कुर्यादित्येकः प्रकारः इति श्रीपूर्णा
नन्दपरमहंसविरचिते श्यामारहस्ये पञ्च
मः परिच्छेदः ५ ॥ अथ मन्त्रभेदा
निरूप्यन्ते तत्रादौ कालिकामन्त्रो अथाद्य
विद्यां प्रथमां वक्ष्ये वानामष्ठय ७ टितेवायो
जपेद्भुक्तिमुक्तिस्स्यात्सोऽतिनाम्नस्पृहगतिः ॐ

ॐ सं स्वतन्त्रत् श्रम्याद्गुरुं परितोष्यष्टह्ली
यां मंत्रराजं गुरूत्तमपि शिष्याय सकुली
नाय विद्याभक्ताय शुश्रूषवे वह्निंघस्य स्म
यपरिष्कृत्य निशायां निरूवेपकाकीशि।
वोहेलद्ध तदर्थं वाजसादेयम् श्रादौ
प्रणवबीजं च लज्ञामायाच तारकम् म
ध्येमूलमदाजसाज यान्ते संपुटीकृतम्
ॐ ॐ संस्वतन्त्रत् नामप्रकारेण सिद्धिर्भ
वति कालिकामनोरेव तदिति त्रिपुरामः
नोर्वा सर्वस्य तु गीमनोवीरेशोशिवम् ॐ
तत्सदिति सर्वाविद्यास्मिति पूर्वोक्तविद्यात
स्याः प्रथमबीजं हृदयं वात्रयं घवा बीजत्रय पु
टितं नाम वाजपेदित्यर्थः कालीतंत्रेपि का
लीहृदयविद्यां च सिद्धविद्यां महोदयाम्
पुरायेन नस्थाजस्वाप सिद्धिमाप्नुर्दिवौकसः
कामारं रवह्निसंस्थमिन्दिरानादबिन्दुभिः
मंत्रराजमिदं ख्यातं तुर्लभं पापवेतसाम् स
लंभं च सततोभक्ता साधकानां महात्मनाम्
त्रिगुणात्म विशेषेण सर्वशास्त्रप्रबोधिका
श्रनयामहपी विद्यानहिसारस्वतप्रदा श्रा

पृपा.
१.

26

कर्षणं वशीकारमारणोच्चाटनं तथा
शान्तिपुष्ट्यादिकमपि साधयेदनया विना
निग्रहमसनेनापि वर्णितुं नैव शक्यते जि
ह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि
अनया सदृशी विद्या अनया सदृशो जपः
अनया सदृशं ध्यानं न भूतं न भविष्यति
ध्यानपूजादिकं सर्वं साधयन्नवपुरस्क्रिया
अनिरुद्धसरस्वत्याः समानं सर्वमीरितम्
अत्र विशेषो यथा कुलचूडामणौ ॥ ह
वंबीजं परं शक्तिबीजं न मूर्तिकल्पना
षड्दीर्घभाजं मन्त्रेण कुर्यादङ्गादिकल्प
नाम् अथास्या ध्यानं यथा तदुक्तं तत्रैव
ध्यायेत्कालीं करालास्यां दंष्ट्रानीलविलोचनाम्
स्फुरच्छवकरश्रेणीकृतकांचीदिगंवराम्
वीरासनसमासीनां महाकालोपरिस्थिताम्
स्मृतिमूलसमाकीर्णसृक्किणीं चण्डनादिनीम्
मुण्डमालागलद्रक्तचर्चितापीवरस्तनीम्
मदिरामोदनास्फालकंपितांविलमेदिनीम्
वामे खड्गं तथा मुण्डं धारिणीं दक्षिणे करे
वराभययुतां घोरवदनां लोलजिह्विकाम्

शकुन्तपत्रसंयुक्तबाणकर्णविभूषिताम्
शिवाभिर्घोररूपाभिः सेवितां प्रलयोदिताम् मू
चण्डहासां चण्डनादां चण्डाक्षां नेत्रभैरवैः
गृहीत्वा नरकंकालान्जयशब्दपरायणैः से
वितां विलसिद्धैश्चैव मुनिभिः सेवितां परा मू प
वृतां कालिकां ध्यात्वा पूजयेत्कुलनायकः
विना परशुरावेशाविवरान्तः प्रसर्पिणीं मू य
त्किंचित्कुलसिद्धिस्तु जायते कमलागतिः
सर्वसिद्धिप्रदा देवी हेलया पिहितविन्निता
अतः सा दक्षिणा नाम्नी विश्वलोकेषु गीयते
अथ प्रकारान्तरम् ततः कालीतन्त्रे अथा
तः संप्रवक्ष्यामि मन्त्रकल्पद्रुमं परम् येन ज्ञा
तेन विधिवत्सिद्धयोगो भवन्ति हि यस्य स्म
दि० रणमात्रेण वाक् विज्ञायते नृणाम् यज्ज्ञा
नाद्भ्रमरत्वेच लभेन्मुक्तिं चतुर्विधाम् येज
पन्ति परां देवीं नियमेन तु संस्थिताः देवाः
सर्वे नमस्यन्ति किं पुनर्मानवादयः बृहस्प
तिसमो वाग्मी यथेयं नृपतिर्भवेत् कामत
ल्यश्च नारीणां विप्राणां च यमोपमः तस्य पा
दाब्जरेणूनां ब्रह्मकोटं भूषणम् तस्य भूतिं

पृपा
१. विलोकैकवक्रवैरोपितिरस्कृतः यपंतोप्र
जयेद्देवीं निरतः पितृकानने तस्यचाज्ञा
कराः सर्वाः सिद्धयोऽष्टौ भवन्ति हि तस्यैव
27 जननीयूमापिता तस्य हरोत्तमः संप्र
दायविदां वक्त्रा यपंतो वेत्ति तत्त्वतः अस्या
विज्ञानमात्रेण कुलकोटीः समुद्धरेत न
रन्ति पितरः सर्वे गाथा गायन्ति ते मुदा
अपियमः कुले कश्चित्कुलज्ञानी भवेदिति
सधन्यः स च विज्ञानी स कविः स च पण्डितः
स कुलीनः स च कृती स वशी स च साधकः
स ब्राह्मणः स वेदज्ञः साग्निहोत्री स दीक्षितः
स तीर्थसेवी पीठानां स निवासी स सर्वदः
स सोमपायी स व्रती स यज्वा स परं तपः
स सन्न्यासी च योगी च स मुक्तो ब्रह्मवित्स च
स वैष्णवः स शैवश्च स सौरः स च गाणपः स
र्वविज्ञानवेत्ता च यपंतो वेत्ति तत्त्वतः तस्मा
त्सर्वप्रयत्नेन सर्वावस्थासु सर्वदा एतां
ध्यात्वा जपेन्मंत्री शिवमोक्षमहाफलम्
विचारं तं प्रवक्ष्यामि शृणु नाकौलवयारय मा
याहृदयं कूर्चयुगंमपन्द्रास्थमदनाद यम

मायाविन्दीश्वरयुतं दक्षिणे कालिके पदम्
संहारक्रमयोगेन बीजसप्तकमुद्धरेत् ॥ प-
ञ्चविंशाक्षरो मन्त्रस्त्राणे विष्णुपूजितः ॥ श्री
कारं कामकर्णेन युतं बिन्दुविभूषितम् ॥
चतुर्थं बीजमाख्यातं त्रैलोक्यवशकारणम् ॥
स्वाहान्तो [illegible] त्रयोविंशाक्षरोयं मन्त्रराजकः ॥
स्वाहान्विनैकविंशाख्यस्तथा कामदो मनुः ॥
विंशार्णो महाविद्या स्वाहा प्रणववर्जिता ॥
ध्यानपूजादिकं सर्वं दक्षिणावदुपाचरेत् ॥
अथान्यप्रकारः तदुक्तं कालीतन्त्रे ॐ अ-
थ वक्ष्ये महाविद्यां सिद्धविद्यां महोदयाम्
ईश्वरेण पुरा प्रोक्तां देवीहृदयसंज्ञितां ॥ अ-
स्या ज्ञानप्रभावेण कलयामि जगत्त्रयम्
प्रणवं पूर्वमुद्धृत्य हृल्लेखाबीजमुद्धरेत् ॥ र-
तिबीजं समुद्धृत्य पञ्चमस्वरान्वितम् ॥ ठ-
द्वयेन समायुक्तं विद्याराज्ञी प्रकीर्तिता ॥ अ-
नया सदृशी विद्या कालीतन्त्रेषु दुर्लभा ॥ भै-
रवोऽस्य ऋषिः प्रोक्तो विराट्छन्द उदीरितम्
सिद्धकाली ब्रह्मरूपा देवता परमेश्वरी ॥ र-
तिबीजं बीजमस्या हृल्लेखा शक्तिरुच्यते

शृण॰ ९॰ ६७

28

हृल्लेखया षड्दीर्घेण प्रणवाद्येन कल्पयेत्
अष्टाक्षरं तन्त्रमस्य ध्यानाद्देवी शिवो भवेत्
उद्यद्भानुद्युतिबिम्बसदृशतरसाह्ला
विताङ्गीं त्रिनेत्रां सत्येपाणौ कपालोज्ज्वल
दसृतमद्यां सुरक्तकेशीं पिबन्तीं दिव्या
स्वां बद्धकाञ्चीमणिमयमुकुटालंकृता
दीर्घजिह्वा पापान्तीं लोचनाभारविश्वा
शिविलसत्कुण्डलालोलपादा जपेद्विं
शतिसाहस्रं मन्त्रमेकेन संयुतं होमयेत्
दशांशेन मन्त्रज्ञ पुष्पेण मन्त्रवित् त्रिको
णकुण्डमासाद्य सिद्धविद्या शिवो भवेत्
एतेन च प्रयोगं च दक्षिणा वद्धपाचरेत्
पकारान्तर्थी महाविद्यासमानं सर्वमेव वा
रक्तपुष्पस्य होमेन साक्षाद्वैश्वानरो भवेत्
बिल्वपत्रस्य होमेन वशयेदखिलं जगत् पी
तपुष्पस्य होमेन स्तंभयेद्वायुमप्युत मा
लतीपुष्पहोमेन साक्षाद्वाक्पतिसन्निभः
कृष्णपुष्पस्य होमेन शत्रुं मारयेत् चिरात्
श्वेतसर्षपस्य होमे समस्तव्याधिस्याद्घृतावपि
श्रवणात् स्मरणमात्रेण महापातककोटयः
सद्यः प्रलयमायान्ति साधकः खेचरो भवेत्

अथ प्रकारान्तरमन्त्रः तन्त्रे कंकालतन्त्रे श्म-
शाने कालिकां मंत्रं शृणुष्वावहिता प्रिये
वाग्भिर्मायां ततो लक्ष्मीं कामबीजं ततः परं
कालिके संपुटं देव नवतत्कं बीजमालिखेत्
एकादशाक्षरी देवि शिवचतुर्वर्गप्रदायिनी ऋ
षिर्भैरवोनुष्टुप्छन्दो देवता कालिका परा श्म
शानाद्या च गाऊंज्ञाया बीजशक्तिर्महेश्वरि
कीलकं कामबीजं स्याच्छृणुष्वाजोवलिप्रिये
विमस्य ध्यानं कुर्वीत कालिकायाः समाहितः
अञ्जनाद्रिनिभां देवीं श्मशानालयवासिनीम्
त्रिनेत्रां मुक्तकेशीं च शुष्कमांसातिभीषणाम्
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णां कपालिकाम्
सद्यःकृत्तशिरो दक्षहस्तेन दधतीं शिवाम्
स्मितवक्त्रां सदा चर्ममांसचर्वणतत्पराम्
नानालंकारभूषाङ्गीं महामत्तां सदासवैः
एवं ध्यात्वा यजेद्देवीं श्मशाने तु विशेषतः
गृहे वापि गृहस्थश्च मत्स्यमांसैः सभोजनैः
नग्नो भूत्वा महापूजां कुर्यात्साधो समाहितः
पंचवाहुदले वृत्तं तद्बाह्ये यंत्रतालम च
तुर्द्वारसमायुक्तं मध्ये मूलं समालिखेत् द

स्कं

पुर॰
१॰ लेपूहूभूविलिखेद्वर्गाद्यपूर्वर्गीकम् य
रणोविलिखेद्धां वक्तृष्कं वचतुष्कम्
पूर्वादि उत राशा यामध्ये देवीं प्रपूजयेत्
ताहृत्यस्याः पूजयेन्मात्रॄ देलपद्मामपूर्वतः
भैरवान्नसितांगरुद्यान्परणोपूजयेत्प्रिये
असितांगादिभैरवान् यथा तदुक्तं तन्त्रान्तरे
असितांगः रुरुश्चंडः क्रोधमुन्मत्तभैरवम्
कपालं भीषणं चैव संहारं चाष्टमं जपेत् अ
थास्याः पुरश्चरणं जपनियमो यथा तदुक्तं
स्वतन्त्रे वर्णलक्षं जपेन्मंत्रं तत्दशांशेन होम
येत् वर्णलक्षं मंत्रं वर्णमालोलक्षं जपमिम
थैः रजस्वलाभिर्विधिना रात्रौ तो हयिरसंयुतास्र
मध्यमांसं च विविधं मत्स्यं चापूर्वविधम्प्रिये
निवेद्य चात्मसात्कृत्वा काली भक्तिपरायणः
तदा भोगं च मोक्षं च लभते नात्र संशयः अ
थमंत्रांतरम् तदुक्तं कालीतंत्रे कामबी
जं समालिख्य कालिकायै पदं लिखेत् न
मोन्तेन च देवेशि समाख्यो मनुरुत्तमः स
र्वाङ्ग. कालिकादेवीस्य मन्त्रं वत्पूर्ववत्
श्रीगुरोः कृपया मंत्री सर्वसिद्धिमवाप्नुयात्

इति श्रीपूर्णानन्दपरमहंसविरचिते श्यामा
रहस्ये मंत्रभेदविवरणं नाम षष्ठः परिच्छेदः ६
अथ विद्यामाहात्म्यम् तत्र कालीतंत्रेपि
एवं समस्तविद्यानां राज्ञी प्रोक्ता न शक्यते
वक्तुं कोटिसहस्रेस्तु जिह्वाकोटिशतैरपि
सर्वसिद्धिप्रदा भूमिरनिरुद्धसरस्वती त
स्या दस्या ज्ञानमात्रात्सिद्धयः संभवन्ति हि
अनिरुद्धसरस्वत्या ज्ञानमात्रेण साधकः
पाण्डित्ये च कवित्वे च वागीशसमतां ब्रजेत्
तस्य पाण्डित्यवैदग्ध्यविचित्रपदकल्पनात्
देवा अपि विलज्जन्ते किं पुनर्मानुषादयः अ
पि चेन्मत्समानानां त्वत्समः पुरुषो भवेत्
अनिरुद्धसरस्वत्याः समो मन्त्रश्च देवता अ
स्या जपो ब्रह्मविद्याज्ञानं मध्यात्माविचिन्तनम्
योगसाधारणं सम्यग्ध्यानमस्या न संशयः
महापदि महापापे महाग्रहनिवारणे म
हाभये महोत्पाते महाशोके महोत्सवे म
हामोहे महादुःखे महाविग्रहसंकटे महा
रण्ये महाश्मशाने महाज्ञाने महारणे हराभा
ने दुरावामे दुर्भिक्षे दुर्निमित्तके समस्तले

पृ०
30

१ शंक्वातैस्मरणादेवनाशयेत अस्यास्ता
नमहाज्ञानंध्यानं[illegible]स्यात्मदर्शनम् तस्मा
दस्याः समाविद्यानास्तितेजेनसंशयः श्म
शानशयनेवीरः कुलस्त्रीभिर्विहारवान्
कुलामृतरसोन्मत्तः कालीतत्वार्थकोविदः
ब्रह्मादिभुवनेतस्य समोस्तिकिमुतापरः
सएव सुकृतीलोके सएव कुलभूषणः
यमाचजननीतस्य येनदेवी समर्चिता व
क्रेसरस्वतीतस्य लक्ष्मीस्तस्य सदागृहे तीर्थी
निदेहेतिष्ठन्ति येनदेवी समर्चिता यनेन
धननाथः स्यात्तेजसा भास्करोपमः बले
नपवनोह्यथ येनदेवी समर्चिता गानेन
तुम्बरुः साक्षाद्दानेकर्णोपमोमतः दत्ता
त्रेयसमोज्ञानीयेनदेवी समर्चिता वह्नि
रिवदुराधर्षोगाङ्गेवमलनाशकः शुचौ
शुचिसमः साक्षादिन्द्रइवसुखप्रदः पि
तृदेवसमः सर्वकाल[illegible]इवदुरासदः स
मुद्रइवगंभीरोनिर्भ्रान्तिरिवदुर्धरः बृह
स्पतिसमोवक्ता धरणीसदृशः क्षमी क
न्दर्पसदृशः कान्त्यायेनदेवीसमर्चिता।

अहो भाग्यमहो लोके कुलज्ञानीपरो मतः
तेषां मध्ये च यः कोपि कालीमायनतत्परः
सज्ज्ञानिस्त्वपरांश्चैव धर्मान्सपरमं तथा म
हेशं च क्वचित्काले सजनस्त्विजन्मये
कालीज्ञानिनमाश्राय नसत्यस्मि कदाच
न नहि कालीसमा शूज्ञा नहि कालीसम
तपः नहि कालीसमं ज्ञानं नहि काली
समं फलम् ये गुणाः परमेशस्य पञ्चवेन
त्वविद्यानतः ते गुणाः सन्ति सर्वज्ञे काली
तत्त्वस्य नाम तथा ज्ञानी कालीहृदयविन्मं
त्रमायनतत्परः देवत्वमाप्नोति भूत्वा लभे
न्मुक्तिं चतुर्विधाम् एतत्ते कथितं सर्वं का
लिकातत्त्वमुत्तमम् अनेन सम्यगास्था
य सर्वकामफलं लभेत् इति श्रीकृष्णानि
न्दपरमहंसविरचिते श्यामारहस्ये सप्त
मः परिच्छेदः ७ अथ कुलीनाचारो लि
ख्यते तत्र कालीतत्त्वे अथातः संप्रव
क्ष्यामि यत्कृते सम्तमश्नुते सर्वभूतहिते
युक्तः सम्यगाचारपालकः अनित्यकर्म
संन्यासी नित्यानुष्ठाननतत्परः मंत्रधारण

मात्रेण सर्वसिद्धीश्वरो भवेत् । पात्राणां देव
तानां तु सर्वकर्मनिवेदकः । श्रमसमं त्रार्च
ने श्रद्धाश्रमसमं त्रपूजने । कुलस्त्रीवीर
निन्दां च तद्द्रव्यस्यापहारणं । स्त्रीषु रोषप्र
हारं च वर्जयेन्मतिमान्सदा । स्त्रीमयं च ज
गत्सर्वं स्वयं तावत्तथा भवेत् । पेयं चर्वं त
था लेह्यं भक्ष्यं भोज्यं गृहं स्त्रियं विभूः सर्वं च युव
तीरूपं भावयेद्यतमानसः । कुलजां युव
तीं वीक्ष्य नमस्कुर्यात्समाहितः । यदि भा
ग्यवशेनैव कुलदृष्टिस्तु जायते । तदैव मा
नसीं पूजां तत्र तां संप्रकल्पयेत् । बालां वा
यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा । कुत्सि
तां वा स्त्रियं दृष्ट्वा नमस्कुर्याद्विभावयेत् । ता
